सागरोपमाणि द्वाविंशतिस्त्रयस्त्रिंशत्॥ छ॥ आदी अन्तविसेसे रूऊणद्धाहिदम्हि हाणि च
यं। उवरिमजेट्ठं समये णहियं हेट्ठिमजहण्णं तु॥१९९॥ आदिसागरदशमांशादिकं ॥२॥ ॥१३॥

।७।१०।१२।२२॥ अन्ते एकसागरोपमादौ १।३।७।१०॥१७।२२॥२३॥ यथायोग्यं समच्छेदेन
स्फेटिते तत्पृथ्वीनां हानिचयौ स्यातां (८/१०) २।४।३।७।५।११॥ कथितायुःप्रमाणपटलत्रयं
मुक्त्वा कृतनपटलसहितरूपोन तत्तत्पटलानां।८।११।८।७।५।३।१॥ इति पृथ्वि
एतावदेतावदायुश्चये (८/१०) २।४।३।७।५॥११॥ एकादिपटलानां कियदायुरिति संपास्य
था योग्यमपवर्त्य गुणिते तेन तत्पटलनामायुश्चयं भवति (१/१०) २/११।४/८।३/७।७/५।५/३।११/१॥
एतच्च श्रेयप्राक्तनस्थिप्राक्तनस्थितौ संयोजिते तत्तत्पटलीना
मुत्कृष्टायुःप्रमाणं स्यात्। उपरिमजघन्यं।८०००० ॥ इत्यादि समायेनाधिकं चेत् अधस्तना
धस्तनजघन्यं स्यात्।२०। अथ तेषां नारकाणां पटलं प्रत्युत्सेधमाह।२०॥ पढमे सत्तति
कंउदयं धणुरयणि अंगुलं सेसे। दुगणकमं पढमिंदे रयणि तियं जाणहाणिचयं॥२००॥
प्रथमपृथ्व्याश्चरमपटले सप्त ७ त्रि ३ षट्कं ६ उदयः धनूरत्न्यंगुलानि द्वितीयादिपृथ्व्याश्चरम
पटले द्विगुणक्रमं प्रथमपृथ्व्याः प्रथमेंद्रके रत्नीत्रयं एतद्धृत्वा हानिचयं जानीहि। हानि
चयसाधनं कथमिति चेत्। आदिं ३ अंते दं ७ हस्त ३ अंगुल ६ शोधयित्वा हस्तस्थाने स्फेट
यित्वा।७०६ रूपोनाध्वहृते ७/१२।०/१२।६/१२। भागो भवेदं उं हस्तादिकं कृत्वा। भक्ते हस्तः २ शेषमं
गुलं कृत्वा (८६/१२) तत्र प्राक्तनांगुलं। ६। मेलयित्वा।१०२। भक्ते लब्धमंगुलं ८ शेषे षड्भिरपव
र्तितेऽंगु लं।१/२। एतत्सर्वं प्रथमे पृथ्व्या हानिचयं।१३/२। दं ०।ह २।अं ८ भा (१/२) इदं उपरितन

स्वस्वजातौ मेलयित्वा दंड दोष्पृथक्कृतेधस्तनपटलदेहोत्सेधः।१।१।८ भा १/२ तत्रैव पुनस्त
द्धानिचयं। दं ० २।८ भा १/२ मेलने।१।३।१७।०॥ तदधस्तनदेहोत्सेधः एवमेव सर्वत्र पटले ये
ज्यः। एवं द्वितीयादिपृथिव्यां हानिचयमुत्सेधश्चानेतव्यः। अथ नारकाणामवधिक्षेत्रमाह।
णारयाणमहपुढवीए चउरोकोसा य उहिखेत्तं तु। तेण परं पडिपुढवीकोसद्धविवज्जियं होदि।
२०१॥ रत्नप्रभापृथिव्याश्चत्वारः कोशाश्चावधिक्षेत्रं ततः परं प्रतिपृथ्विक्रोशार्द्धविवर्जितं भ
वति। अथ नरकान्निःसृतस्य जीवस्योत्पत्तिनियममाह। रू॥ णिरयादो णिस्सरिदो णरति
रिए कम्मसणिपज्जत्तेगब्भभवे उप्पज्जदि सत्तमपुढवी दु तिरिए व॥२०२॥ निरयान्निःसृ
तः नरतिरश्चोर्गत्योः कर्मभूमौ संज्ञिनि पर्याप्ते गर्भभवे उत्पद्यते। सप्तमपृथिव्यास्तु नि
र्गतस्तादृग्विधतिरश्चां गतावुत्पद्यते॥ अथ णरतिरिए इति नियमे तत्रापि किं सर्वत्रेत्याशं
=तेषां चारित्रप्रधानत्वात्। नरके चारित्राभावात्। २२= कायामाह॥ रू॥ णिरयचराणत्थि हरीबलचक्की तुरियपहुदिणिस्सरिदो। तित्थचरमंगसंज
दमिस्सतियं णत्थि णियमेण॥२०३॥ नरकचरा न सन्ति हरिर्बलचक्रिणो तुर्यपृथ्वीप्रभृति
निःसृतः यथासंख्यं॥ तीर्थकरचरमांगसंयताभिश्रत्रयामिश्रासंयतदेशासंयता न सन्ति नियमे
न। असंयतत्वस्य निषिद्धत्वादर्थात्सासादनत्वस्याप्यभावः एव। अथ नरकं गच्छतां जीवानां पृथ्वीं ३८
प्रतिनि[illegible]ह। रू॥ अमणसरिसपविहंगमफणिसिंहित्थीण मच्छमणुवाणं। पढमादिसु उप्प

त्तीअउरगा दो दु दोणि वारोत्ति ॥२०४॥ अमनस्कसरीसृपविहंगमपक्षिणि। सिंह। स्त्रीणां। मत्स्य
मनुष्याणं प्रथमादिषु यथासंख्यमुत्पत्तिर्न्निरन्तरं कथमिति चेदष्टवारतः आरभ्य द्विवारपर्यन्तं
अमनस्कः प्रथमनरकं गत्वा ततो निर्गत्य संज्ञिभूत्वा मृत्वा पुनरत्रैवासंज्ञिसम्भूय मृत्वा प्र
थमनरकं गच्छति इदमेकवारं एवम संज्ञिनोऽष्टवारं निरंतरं योजयेत्। निरन्तरासंभवेन एक
मन्तरं गृह्णीयात्। नैवं सरीसृपादिषु। मत्स्यः सप्तमनरकं गत्वा ततः प्रच्युत्य तिर्यग्जीवो भू
त्वा मृत्वा मत्स्यः सम्भूय मृत्वा सप्तमनरकं गच्छति नरस्यैवं निरन्तरं द्विवारं योजयेत्। अथ
प्रथमादिपृथिव्या उत्कृष्टेन जननमरणयोरन्तरमाह॥ छ॥ चउवीसमुहुत्तं पुण सत्ताहं प
क्खमेकमासं च। दुगचउछम्मासं च य जम्मणामरणंतरं णिरये ॥२०५॥ चतुर्विंशतिर्मुहू
र्त्ताः पुनः सप्ताहानि पक्षः एकमासश्च द्विकचतुःषण्मासाश्च जननमरणांतरं। यथासं
ख्यं निरये तेषां दुःखप्रागल्भ्यमाह॥ छ॥ अच्छिणिमीलणमेत्तं णत्थि सुहं दुःखमेव अणुबद्धं
णिरए णेरइयाणं अहोणिसं पच्चमाणाणं॥२०६॥ अक्षिनिमीलनमात्रं नास्ति सुखं दुःख
मेवानुबद्धं निरये नैरयिकाणां अहर्निशं पच्यमानानां॥ इति नरकस्वरूपनिरूपणं समा
प्तं॥ छ॥ अथ लोकस्य सामान्यवर्णनां कृत्वा। भवणवेंतरेत्यादिगाथासूचितपञ्चाधिकाराणां
मध्ये तथैव भवनाधिकारं प्रक्रममाणास्तदधिष्ठानभूतां रत्नप्रभां तत्सहचरितां शर्कराप्रभादि
भूमिं तद्गतनरकप्रस्तरान् तद्गतनारकायुरादिकं च प्रासंगिकं सर्वं व्याख्याय प्रकृतम

त्रि॰सा॰ वनाधिकारं प्रवक्तुकामस्तदादौ भवनलोकचैत्यालयान्वंदमानस्तद्‌मंगलमाह॥ छ॥ भव
३९ णेसु सत्तकोडी बावत्तरिलक्खहोंति जिणगेहा। भवणेमरिंदमहिया भवणसमाणेताणि
वंदामि॥ २०७॥ भवनेषु सप्तकोट्यः द्वासप्ततिलक्षाणि भवन्ति जिनगेहानि। भवनामरें
द्रमहितानि तेषां भवनसमानि तानि वंदे। अथ भवनवासिनां कुलभेदं च गाथात्रये- प्रतेषां दहना नामि ३
णाह॥ छ॥ असुरणाग सुवण्णा दीवोदही विज्जुथणिद दिसअग्गी। वातकुमाराप
ढमे चमरो वइरोइणो इंदो। २०८॥ असुरः नाग सुपर्णो द्वीपोदधि विद्युत स्तनित दिग्अग्नयः
वातकुमारः कुमारशब्दः प्रत्येकमभिसंबध्यते प्रथमे कुले चमरो वैरोचनोश्चेति द्वाविं-
द्रौ। छ॥ भूदाणंदो धारणाणंदो वेणूय वेणुधारीय। पुण्णवसिट्ठजलप्पहजलकंत्ताघोसमह
घोसा॥ २०९॥ भूतानंद धरणानंदो वेणुश्चा वेणुधारी च पूर्णश्च वशिष्टजलप्रभजल
कांताघोषमहाघोषो। छ॥ हरिसेणो हरिकंतो अमिदगदी अमिदवाहणग्गिसिही। अ
ग्गीवाहणणामा वेलंबपभंजणा सेसे। २१०॥ हरिसेणो हरिकान्तः अमितवाहनाग्नि
शिखिनौ। अग्निवाहननामा वेलंब प्रभंजनौ शेषेन। नागादिकुले। अथ तेषां परस्परस
र्द्धां स्थानं माह। छ॥ चमरो सोहम्मेण य भूदाणंदोय वेणुणा तेसिं। विदिया विदियेहि
समं इसंति सहावदो णियमा॥ २११॥ चमरः सौधर्मेण च भूतानंदश्च वेणुना तेषां द्विती ३९
या द्वितीयैः समं ईर्ष्यांति स्वभावतो नियमात्। अथ कुलेशानामसुरादीनां चिन्हमाह। छ॥

चूडामणिफणिगरुडंगजमयरंवद्धमाणगंवज्जं। हरिकलससंसंचिह्नंमउलेचेत्तदुमा अहधया॥
२१२॥ चूडामणिफणिगरुडगजमकरंवर्द्धमानकंवज्रं। हरिकलसाऽश्वंचिह्नंमुकुटेचैत्यद्रुमाः॥
अथध्वजाश्चानेषांचिन्हाः॥ अथतच्चैत्यवृक्षभेदानाह॥ मू॥ अस्सत्थसत्तसामलिजंबूवेत्तस
कदंबकपियंगूसिरिसंपलाससरायदुमा चअसुरादिचेत्ततरू॥ २१३॥ अश्वत्थसप्तच्छदशाल्म
लिजंबूवेतसकदंबकप्रियंगवः शिरीषः। पलाशराजद्रुमौ च असुरादिचैत्यतरवः॥ अथचै
त्यद्रुमाणामन्वर्थतांसमर्थयति॥ मू॥ चेत्ततरूणंमूलेपत्तेयंपडिदिसम्हिपंचेव। पलि
यंकठिया पडिमासुरच्चियाताणिवंदामि॥२१४॥ चैत्यतरूणांमूलेप्रत्येकंप्रतिदिशंपंचै
वपर्यंकस्थिताः प्रतिमाः सुरार्चिताः ताःवंदे॥ अथतत्प्रतिमाग्रस्थमानस्तम्भस्वरू
पमाह॥ मू॥ पडिदिसयंणियसीसेसगसगपडिमाजुदा विराजंति। तुंगामाणत्थंभारय-
णमयापडिदिसंपंच॥२१५॥ प्रतिदिशंनिजशीर्षेसप्तसप्तप्रतिमायुताविराजंतेतुंगा
मानस्तंभारत्नमयाप्रतिदिशंपंच॥ अथेंद्राणांभवनसंख्यांज्ञापयन्नाह॥ मू॥ चोत्तीसं
चउदालंअडतीसंछसुविनालपण्णासं। चउचउविहीणताणियइंदाणंभवणलक्खाणि॥
२१६॥ चतुस्त्रिंशच्चतुश्चत्वारिंशत् अष्टत्रिंशत्षट्सुस्थानेषुचत्वारिंशत्पंचाशदुत्तरेंद्रा
न्प्रतिचतुश्चतुर्विहीनानिताानिइंद्राणांभवनलक्षाणि॥ अथतेषांभवनानांविशेषस्वरूप-
माह॥ मू॥ सत्तुगंधपुप्फसेहियरयणधरारयणभित्तिणिच्चपहा। [illegible] दिपसुहदार

त्रि॰सा॰ हिंसिरिखंडादिहिचिदाभवणा॥२०७॥ सुगंधपुष्पशोभितरम्यधरारत्नभित्तयः नित्य
५० प्रभाः सर्वेंद्रियसुखदायिभिः श्रीखंडादिभिश्चिताभवना॥ अथ तत्रत्यदेवानामैश्वर्यमाह॥
अट्ठगुणिड्ढिविसिट्ठाणाणामणिभूसणेहिंदित्तंगाभुंजंतिभोगमिट्ठंसगपुव्वतवेणतत्थ
सुरा।२०८॥ अष्टगुणर्द्धिविशिष्टाः नानामणिभूषणैर्दीप्तांगाभुंजंतिभोगमिष्टं स्वक
पूर्वतपसा तत्र सुराः। अथ तेषां भवनानां भूगृहोपमानानां व्यासादिकमाह॥ ॥ जोयण
संखासंखाकोडीतविस्थडं तु चउरस्सा तिसयं बहलं मज्झं पडिसयतुंगेक्ककूडं च॥२०९॥ ज
घन्यनयोजनानां संख्यातकोट्यः उत्कर्षेण असंख्यातकोट्यः उत्कर्षेण असंख्यातकोट्यः
तद्विस्तारस्तु चतुरस्राः त्रिशतयोजनबाहल्यं तत्र प्रति मध्यं शततुंगैककूटस्तदुपरि वे-
त्यालयश्च॥ अथ तेषां भवनावस्थितिस्थानानि गाथाद्वयेनाह। ॥ वेंतरअप्पमहद्धियम
ज्झिमभवणाणभवणाणि। भूमीदोधोगदुगबादालसहस्सइगिलक्खे॥२१०॥
व्यन्तराणां अल्पर्द्धिकमध्यमर्द्धिभवनामराणां च भवनानि। चित्राभूमितः अधोधः ए
कसप्तसहस्रद्विचत्वारिंशत्सहस्रएकलक्षाणि योजनानि गत्वा भवन्ति। ॥ खरपण
हपंकहेभागेअसुराणंहोंति आवासा। भौमे सुरक्खसाणं अवसेसाणं खरे भागे॥२११॥ रत्नप्र ५०
भापंकाख्ये भागे असुराणां भवनावासाः। भौमेषु व्यन्तरेषु राक्षसानां अवशेषाणां नागादी
नां खरे भागे॥ इदानीं मिंद्रादिभेदमाह। ॥ इंदंपडिंददिगिंदातेत्तीससुरसमाणतणुरक्खा

परिसत्तयआणीया। पइण्णगभियोगकिब्बिसिया॥ २२२॥ इंद्रप्रतीन्द्रदिगींद्राः त्रयस्त्रिं
शात्सुराः सामानिकतनुरक्षकौ। परिषत्त्रयानीकौ प्रकीर्णकाभियोग्यकिल्विषिकाः अथें
द्रादिपदवीनां दृष्टान्तमाह॥ रू॥ रायजुवतंतरएसपुत्तकलत्तगरक्खवरमज्झे॥ अवरे तउ
सेणापुरपरिजणगायणो हि समा॥ २२३॥ राजयुवतंत्रराजेश्वपुत्रकलत्रांगरक्षैः वरेणाम
ध्येन। अवरेण च तंडेण अवलेगेन सेनापुरपरिजनगायकैः समाः॥ अथ चतुर्निकायाम
रेष्विंद्रादीनां सम्भवप्रकारमाह॥ वेंतरजोयिसियाणं तेत्तीससुराण लोयपालायभवणे
कप्पेसव्वे हवंति अहमिन्दया तत्तो॥ २२४॥ व्यंतरज्योतिष्काणां त्रयस्त्रिंशात्सुरान संति लोक-
पालश्च भवने कल्पे च सर्वे भवन्ति ततः परमहमिंद्राः। अथ भावनेष्विंद्रादिपरिषत्त्रयांता
नां संख्यागाथात्रयेणाह॥ रू॥ इंदसमा हु पडिंदा सोमो यमवरुणतह कुवेरया। पुव्वादि-
लोयवाला। तेत्तीससुरा हु तेत्तीसा॥ २२५॥ इन्द्रसमाः खलु प्रतींद्राः सोमो यमो वरुणस्त-
था कुवेरश्च पूर्वादिलोकपालाः त्रयस्त्रिंशात्सुराः त्रयस्त्रिंशद्देवाः। चमरत्तियेसामाणिय
तणुरक्खाणं पमाणमणुकमसो। अडसोलसकदिसहस्सा चउसोलसहस्सहीणकमा॥
२२६॥ चमरत्रिके सामानिकतनुरक्षाणां प्रमाणमनुक्रमशः अष्टकृतिषोडशकृतिस
हस्राणि चतुःसहस्रषोडशसहस्रहीनः क्रमः॥ रू॥ पससहस्सविलक्खासेसे तट्ठाणपएस
मादिल्लं। अडछूवीसं छच्चउसहस्सदुसहस्सवट्टिकमा॥ २२७॥ पञ्चाशत्सहस्राणि द्विलक्षे

शेषेनागादिषु तत्स्थाने चमरत्रिकशेषस्थाने आदिमापरिषद् द्वाविंशति सहस्राणि षड्विं
शति सहस्राणि षड्सहस्राणि चतुःसहस्राणि मध्यमबाह्यपरिषदोस्तु उक्तसहस्रेष्वे
वद्धिसहस्रवृद्धिक्रमो ज्ञातव्यः। ॥ अथ परिषत्त्रयाणां विशेषाभिधानमाह॥ ॥ पढ
मापरिसा समिदा विदिया चंदो त्तिणाम दो होदि। तदियाजदु अहिधाणा एवं सव्वेसु देवेसु॥
२२८॥ प्रथमापरिषत् समित् द्वितीया चंद्रेतिनामतो भवति तृतीया जत्वभिधाना। एवं सर्वेषु दे
वेषु। इदानीमानीकभेदं तत्संख्यां चाह॥ ॥ सत्तेव य आणीया पत्तेयं सत्त सत्त कक्खजुदा। प
ढमं ससमाणसमं तद्दुगुणं चरिमकरेकात्ति। २२९॥ सप्तैवानीकाः प्रत्येकं सप्त सप्त कक्ष्ययुताः
प्रथमानीकं स्वसामानिकसमं तद्द्विगुणं चरमकक्षं यावत्॥ अथ गुणोत्तरक्रमेणागत
सप्तानीकधनानयने प्रयुक्तमिदं गुणसंकलितसूत्रं। पदमेत्ते गुणयारे अण्णोण्णं गु
णिय रूवपरिहीणे। रूऊणगुणेणहिये मुहेण गुणियम्मि गुणगणियं॥ २३०॥=
पदमात्रगुणकारान्। २२२२२२२॥ अन्योन्यं संगुण्य लब्धे १२८॥ रूपेण परिहीने। १२७॥ रू
पोनगुणेन तद्दत्ते॥ १२७/१ मुखेन ६४००० गुणिते सति ८१२८०००। गुणसंकलितधनमायाति। ए
तस्मिन् सप्तभिर्गुणिते॥ ५६८९६००० सप्तानीकसमस्तधनमायाति। एवं वैरोचनादिषु- ४१
ज्ञातव्यं। अस्य करणसूत्रस्य वासना उदाहरणान्तरेण प्रदर्श्यते। आदि २ गुणोत्तर ५ गच्छ ४
अस्य न्यासः

| |
|---|
| २।५।५।५।१ |
| २।५।५।१ |
| २।५।१ |
| २।१ |

अस्य समस्तधनं पदमेत्तेत्यानीतं ३१२ अस्य न्यासः

| |
|---|
| २।५।५।५।३ |
| २।५।५।३ |
| २।५।३ |
| २।५ |

नयधा। आरेणात्मप्रमाणेनैकस्मिन्रूपे।२।१।। रूपोनगुणोत्तरगुणितमादिमा।३।२।४।। ऋणप्र
क्षेपणेनाऽङ्कस्यांकसदृशं दर्शयित्वाऽसदृशस्थाने मेलयेत्।२।५। इदं द्वितीयधने योजनेऽङ्क
स्यांकसदृशं दर्शयित्वाऽसदृशस्थाने उपरितनात्मप्रमाणैकरूपेऽधस्तनात्मप्रमाणैकरूपं
युंज्यात् २५।।२ अत्र द्विरूपोनगुणकारगुणितनगुणघ्नमादि २।५।३। ऋणं निक्षिप्य २५५। इदं तृती
यधने युंज्यात्।।२५५२।। अत्र द्विरूपोन गुणघ्नगुणकारवर्गगुणितमादि२५५३। ऋणं निक्षि
प्य २५५५।। चतुर्थधने युंज्यात्।२५५५२।। अत्र द्विरूपोनगुणघ्नगुणकारघनगुणितमादि२
५५५३ ऋणंनिक्षिपेत्।२५५५५ एवमुपरि सर्वत्र द्विरूपोनगुणेन रूपोनगच्छमात्रगुणका
रैश्च गुणितमादिं ऋणं निक्षिपेत्। तथा च सति अंतधने आदेर्गच्छमात्रा गुणकाराभवंत्ये
तत्सर्वं मनसि कृत्य पदमेत्ते गुणयोरन्योन्यं गुणयेत्युक्तं। एवमिष्टगच्छमात्रेषु गुणका
रेषु अन्योन्यंगुणितेष्वेवं।२।६।२५। इदं ऋणसहितं धनं अत्र प्राग्निक्षिप्तऋणापनयने तावत्त्र
यमेकऋणैकरूपगुणितमादि।२।१। उद्धृत्यापनयेत्। इदमेवावधीर्य रूपपरिहीणो इत्युक्तं
अपनीतशेषमिदं।२।६२४। अत्र सर्वऋणसंकलितमिदं।।२।६२४।। (३/४) ।रूपोनगुणेन सम
च्छेदीकृतेऽस्मिन्।२।६२४ (४/४) अपनयेत् अपनीते सत्येवं।२।६२४। (१/४) इदं मनसा संप्र
धार्य रूपोनेनाहियेत इति उक्तं पुनरपवर्त्य आदिना गुणिते गुणसंकलितधनमागच्छ
ति।३१२।। इदं विचार्य मुखेन गुणितायम्मीत्युक्तं एवं सर्वत्र ऋणराशिः रूपोनगुणकारविभक्तसम

त्रि·सा·
४२
स्तराशेर्बहुभागप्रमाणो जायते शुद्धधनराशिस्तु तदेकभागो जायते इति व्याप्तिः सर्वत्र यो
ज्या। इदानीमानीकभेदस्वरूपं गाथाद्वयेनाह। रू॥ असुरस्स महिसतुरगरथेभपदातीक
मेण गंधव्वाणि णच्चाणिय महत्तर महत्तरी छक्क एक्काय।२३१॥ असुरस्य महिषतुरगरथेभपदा
तयः। क्रमेण गन्धर्वाः नृत्यानीकं प्रथमाः षट् महत्तरा। नृत्यानीकमेकं महत्तरी॥ रू॥ णागग
रुडिभमयरं करभं खग्गी मिगारि सिबिग स्सं। पढमाणियं सेसे सेसाणि पाहुडुवं व॥२३२॥
नैगरुडेभमकरं करभः खड्गी मृगारि शिविकाश्वं प्रथमानीकं। शेषे नागादौ शेषानीकास्तु
पूर्वमिव। अथ भावनदेवानामसंख्यातत्वात्॥ प्रकीर्णकादिदेवानामसंख्यातत्वमनुक्रम
प्यवगंतव्यं। इति तत्प्रमाणमनुक्त्वा साम्प्रतमसुरादिदेवीनां संख्यां गाथाद्वयेनाह॥ रू॥ अ
सुरतिए देवीओ छप्पण सहस्स तत्थ वल्लभिया। सोलसहस्सं छक्कसहस्सेणूणक्कमो होइ
॥२३३॥ असुरत्रिके देव्यः षट्पंचाशत्सहस्राणि। तासु वल्लभिकाः षोडशसहस्राणि षट्सह
स्रेणोनक्रमा भवति। रू॥ बत्तीसवसहस्सा सेसे पणपण सजेट्ठदेवीओ। तिसु अट्ठ छस्सहस्सं
विगुव्वणा मूलतणुसहियं॥२३४॥ द्वात्रिंशत्सहस्राणि द्विसहस्रे शेषे द्वीपादौ। तासां मध्ये पंच पं
च ज्येष्ठदेव्यः असुरादिदेवी त्रिस्थानेषु शेषे च ज्येष्ठदेव्यः अष्टसहस्र षट्सहस्रविकुर्वणा ४२
मूलतनुसहिताः॥ अथ चमरवैरोचनयोः पट्टदेवीनां संज्ञामाह। रू॥ किण्हा सुमेघ सुकहा रय
णी पाजहिंथिय पउम महपउमा। पउमसिरी कणयसिरी कणयादिममाल चमरदुगे॥२३५॥

कृष्णा सुमेघा सुकासुकाढ्या रत्नी च ज्येष्ठास्त्रियः पद्मा महापद्मा पद्मश्री कनकश्रीः कनकमा
लाः एताश्चमरहितकेष्वेन्द्रादिपञ्चानां देवीमानं समानमित्यनुक्तान्तरेषां कान्ता निरूपयति
गाथात्रयेण। छ॥ अड्ढाइज्जंति सयं पणासुणं कमं तु चमरदुगे। पारिसदेवीणागे विसयं तु
ससट्ठितालसयं ॥२३६॥ अर्द्धतृतीयं शतं। त्रिशतं पंचाशदनक्रमस्तु ज्ञातव्यश्चमरद्विके पारि
षद्देव्यः नागे तु द्विशतं सषष्टिशतं। सचत्वारिंशच्छतं॥ छ॥ गरुडे सेसे सोलस चउदस दस
संगुणं तु वीसेणं। सयसय देवीपेधा महत्तराणं गरक्खाणं ॥२३७॥ गरुडे शेषे दश संगुणाः
षोडश दश संगुणाश्चतुर्दश। तत्रैव मध्यबाह्यपरिषदो विंशत्यूनाः शतं शतं देव्यः एतेना
महत्तराणामंगरक्षाणां। छ॥ सेणा देवाणं पुण देवीयो तस्स अद्धपरिमाणं। सव्वणिगिट्ठ
सुराणं बत्तीसा होंति देवीओ ॥२३८॥ सेनादेवानां पुनर्देव्यः तस्य तस्य सेनामहत्तरस्यार्द्धप
रिमाणं ॥५०॥ सर्वनिकृष्टसुराणां द्वात्रिंशद्भवंति देव्यः॥ अथ भवनवासिनामथैवस्य मा
णव्यंतराणां च जघन्योत्कृष्टमायुराचष्टे। छ॥ असुरादि चदुसु सेसे भोम्मे सायर ति पल्लमा
उस्सं। दलहीणकमं जे हं दसवाससहस्समवरं तु ॥२३९॥ असुरादिषु चतुर्षु शेषे भौमे च यथा
संख्यं सागरोपमं त्रिपल्यमायुष्यं दलहीनक्रमः। एतत्सर्वं ज्येष्ठं अवरं त्वायुर्दशवर्षसहस्रं। अ
थोक्तानामेव सविशेषेणायुः कथयन् तद्देवान्यत्रेति निरूपयति॥ छ॥ असुरचउक्के सेसे उरही
पल्लत्तियं दलूणकमं॥ एतद्देवोत्तरेंद्राणां साधिकं सद्दशाभिं द्वादिपंचानां। अथ तद्देवसाहत्वयं

त्रि॰सा॰ विशेषेण निरूपयति। छ॥ आऊपरिवारिद्धीविक्किरियाहिं पडिंदयादि चऊ। सगसगइंदेहिं स-
४२ मा दहरछत्तादिसंधजुत्ता।२४१॥ आयुःपरिवारर्द्धिविक्रियाभिः प्रतींद्रादयश्चत्वारः स्वकस्वकें-
द्रैः समाः किन्तु दभ्रं ह्रस्वं तेन छत्रादिना संयुक्ताः। छ॥ असुरादींद्रदेवीनामायुः प्रमाणमाह।
छ॥ अड्ढाइज्जतिपल्लं चमरदुगे णागगरुडसेसाणं मद्धमं पुण पुव्वावस्साणकोडितयं॥
२४२॥ अर्द्धतृतीयं पल्यं त्रिपल्यं चरमहिके देवीनां। नागगरुडशेषाणां देवीनां यथासंख्यं प-
ल्याष्टमभागः पुनः पूर्वकोटित्रयं वर्षाणां कोटित्रयं ज्ञातव्यं। अंगरक्षपरिषत्त्रयाणामायु-
ष्यं गाथाचतुष्केणाह। छ॥ चमरंगरक्खसेणामहत्तराणाउगं हवे पल्लं। साणीकवाहणाणं
दलमणुवरेयणे अहियं॥२४३॥ चमरांगरक्षसेनामहत्तराणामायुष्यं भवेत्पल्यं आनीकः
आरोहकः। तेन्नसहितानां वाहनानां दलं अर्द्धपल्यमेतदेव वैरोचने साधिकं। छ॥ फणिग-
रुडसेसयाणं तद्दाणे पुव्ववस्सकोडी य। वस्साणकोडिलक्खं लक्खं च तदद्धयं कमसो॥२४४॥
फणिगरुडशेषाणां एतत्स्थाने अंगरक्षसेनामहत्तरानीकवाहनस्थाने पूर्वकोटिः वर्षको-
टिश्च वर्षाणां कोटिः वर्षाणां लक्षं लक्षं च तदर्द्धकं क्रमशः। छ॥ चमरदुगे परिसाणं अड्ढाइज्जं
तिपल्लमद्धूणं णागे अट्ठमभागं सोलसबत्तीसभागन्तु॥२४५॥ चमरद्विके परिषत्त्रयाणां अ- ४२
र्द्धतृतीयं पल्यं त्रिपल्यं मध्यमबाह्यपरिषदोरर्द्धार्द्धपल्योनं नागे पल्याष्टमभागं पल्यषोडश-
भागं पल्यद्वात्रिंशद्भागमायुः। छ॥ गरुडे सेसे कमसो तिगदुगमेक्कं तु होदि पुव्वाणं। वस्साणको-

ढीओ परिसाणं अंतरादीणं ॥२४६॥ गरुडे शेषे च क्रमशः तिस्रः ढ एका तु भवति पूर्वा
णां कोघस्तथावर्षाणां को द्युः पारिषदानामभ्यंतरादीनां ।असुरादीनामुच्छ्वासाहारक्रमं
कथयति ।ढ॥ असुरेत्ति तिसु सासाहारपक्खं समासहस्सं तु समुहुत्तदिणाणं दुने रस
वारसदलूणाहं ॥२४७॥ असुरेत्रिस्त्रिषु च उच्छ्वासाहारोपदे एकवारं समासहस्रे च एकवा
रं समुहूर्त दिनयोः र्द्धत्रयोदशो द्वादशे दलोनाष्टमे भागे एकैकवारं ।अथ भवनत्रयाण
मुत्सेधमाह ।ढ। पणवीसं असुराणं सेसकुमाराणं दसधणु चेव। विंतरजोइसियाणं दस
सत्तसरीरउदओ दु ॥२४८॥ पंचविंशतिः असुराणां धनुषामुदयः ।शेषकुमाराणां दशध
नुषा चैवोदयः व्यन्तरज्योतिष्कयोः दशसप्तधनुः शरीरोदयस्तु ॥ इति भवनलोकाधि
कारः समाप्तः ।ढ॥ इदानीं व्यन्तरलोकं निरूपयितुमनास्तावत्तल्लोकस्थितचैत्याल
यानां प्रमाणपूर्वकं नतिं वितनोति। तिरिासपजोयणाणं कदिहिदपदरस्स संखभागमिदे ।भो
माणं जिणगेहे गणणातीदे णमंसामि ॥२४९॥ अंगुलस्य च अंगुलीकृतत्रिशतयोजनस्य कृतिं
गृहीत्वा ९०००० । एकयोजनस्य १ एतावन्तु ७६८००० अंगुलेषु सत्सु इयतां योजनानां ॥ ९००००
किमिति ति त्रैराशिकविधिनां ऽगुलानि कर्त्तव्यानि वर्गराशेः गुणकारभागहारौ वर्गरूपे
ण भवनइति न्यायेन गुणकारोऽयं वर्गात्मको भवति॥ २= ७६८००० / ७६८००० तत्रेदमंगुलांकं त्रिभिर्भे
दयित्वा २५६।३ / २५६।३ गुणपगुणकारस्थिन शून्य दशांकं ए पवर्गकृत्वा च सदृश

णाद्वयगुणानेपणाहिज्जोतापरस्परगुणितत्रिकद्वयेन ९ प्राक्तननवकेगुणितेएकाशीति
रभूत्पुनरसंख्यातादिं ६५=८१।।१०।।सूच्यंगुलरूपंएकस्यांगुलस्यएकस्मिन्सूच्यंगुले २
सतिइयतांकिमितिसंपात्यसूच्यंगुलवर्गीकृत्य ४ गुणयेत्पुनरनेनजगत्प्रतरेभक्ते ४।
६५=८१।१० सून्य।व्यंतरपरिमाणंस्यात्तदुक्तंतिण्णिसयजोयणाणांवेसदछप्पण्णअं
गुलाणांच।कदिहिदपदरंवेंतरजोयिसियाणंचपरिमाणं।इतिपुनःसंख्यातदेवानांप्र१ए
कस्मिन्जिनगेहेफ१इयतां ३।६५=८१।१० सू किमितिसंपात्यसंख्यातेनजगत्प्रतरेभक्ते
४।६५=८१।१०।१ व्यंतराणांजिनगेहप्रमाणंस्यात्।अथव्यंतराणांकुलभेदंनिरूपयति।
छ।।किंणरकिंपुरिसायमहोरगगंधव्वजक्खणामायरक्खसभूयपिसीयाअट्ठविहावेंत
रादेवा।।२५०।।किंनरकिंपुरुषोचमहोरगगंधर्वयक्षनामानःराक्षसभूतपिशाचाःअ
ष्टविधाव्यन्तरदेवा।अथतेषांशरीरवर्णंनिरूपयति।छ।।तेसुकिंसिंकमसोवण्णापियंगु-
फलधवलकालयसियामं।हेमंतिसुविसिपामंकिएंहबहुलेवभूसाय।।२५१।।तेषांक्र
मशःशरीरवर्णाःप्रियंगुफलधवलकालश्यामाहेमवर्णास्त्रिषुपिशामवर्णाःकृष्णवर्णः
तेदेवाबहुलेपभूषणाः।अथतेषांचैत्यतरुभेदमाह।छ।।तेसिंअसोयचंपयणागतुंबुरुवडो ४४
यकंटतरूःतुलसीकदंबणामाचेत्ततरूहोंतिहुकमेण।।२५२।।तेषामशोकचंपकनागके
सरतुंबुरुवटाश्चकंटतरूःतुलसीकदंवनामाचैत्यतरवोभवन्तिखलुक्रमेण।।अथत

चैत्यतरुमूलस्थजिनप्रतिमादिमाह। छ॥ तम्मूले पलियंकगजिणपडिमापडिदिस-
म्हि चत्तारि। चउतोरणजुत्ताते भवणेसु च जंबुमाणा हु॥ २५३॥ तन्मूले पल्यंकगजिन
प्रतिमाः। प्रतिदिशं चतस्रश्चतुस्तोरणयुक्तास्ताः भवनेषु च चैत्यतरवः जंबूवृक्षपरि
करप्रमाणा हि॥ अथ तदग्रस्थमानस्तंभं सविशेषं निरूपयति। छ॥ पडिपडिमं एक्केक्का
माणत्थंभा तिपीढसालजुदा। मोत्तियदामं सोहइ घंटाजालादियं दिव्वं॥ २५४॥ प्रतिप्रतिम
मेकैकमानस्तंभाः त्रिपीठत्रिशालयुताः तत्र मौक्तिकंदाम शोभते। दिव्यं घंटाजालादिकं
च। अथ अष्टविधव्यन्तराणां प्रतिकुलमवांतरभेदमाह। छ॥ किंणरचउदसदसधा से
सा बारसगसत्तचोदसधा। दो दो इंदा दो दो वल्लभिया पुह सहस्सदेहि जुदा॥ २५५॥ किंनरा
दयश्चत्वारः दशधा दशधा भिद्यंते शेषाः यक्षादयः द्वादशधा सप्तधा सप्तधा चतुर्दशधा।
अत्र द्वौ द्वाविंद्रौ तयोर्द्वे द्वे वल्लभिके पृथक् पृथक् सहस्रदेवीयुते। अथ तेषां संज्ञां षोडशगा-
थाभिर्निरूपयति। छ॥ किंपुरिसकिंणरत्तवियहिदयंगमगाय रूपपाली य किंणरकिंणरणिं
दितमणरम्मा किंणरुत्तमगा। २५६॥ किंपुरुषकिंनरा अपि हृदयंगमश्च रूपपाली च। किंन
रकिंनरः। अनिंदितः मनोरमः किंनरोत्तमः। छ। रतिपियजेट्ठा इंदा किंपुरिसा किंणरा वतंसा हु।
केतुमती रतिसेणा रतिप्पिया होंति वल्लभिया। २५७॥ रतिप्रियज्येष्ठौ १० तत्रेंद्रौ किंपुरुषकिं
नरौ। तयोरवतंसा। केतुमती। रतिशेणा। रतिप्रियाः भवंति वल्लभिकाः। छ। पुरुसा पुरुसुत्तमसप्पु

समहापुरुसपुरुसपहणामा ॥ अतिपुरुसा मरुउ मरुदेव मरुप्पह जसोवंतो ॥२५८॥ पुरु
षपुरुषोत्तमसत्पुरुषमहापुरुषपुरुषप्रभनामानः। अतिपुरुषः मरुर्मरुदेव मरुत्प्रभ।
यशस्वन्तः।छ॥ सप्पुरुसमहापुरुसा किंपुरिसिंदा कमेणवल्लभिया। रोहिणिणवमीदे
वीहिरिपुप्फवदीयइयरस्स।२५९॥ सत्पुरुषमहापुरुषौ किंपुरुषेंद्रौ क्रमेण वल्लभि
काः रोहिणीनवमीदेवीपूर्वेंद्रस्य। ह्रीपुष्पवती चेतरस्य।छ॥ भुजगाभुजंगसालीमहकाय
तिकायक्खंधसालीय। मणहरअसणिजवक्खा महसरगंभीरपियदरिसा॥२६०॥ भुज
गः भुजंगशाली महाकायोऽतिकायः। स्कंधशालीव मनोहरः अशनिजवाख्य महेश्वरप्र
गंभीरप्रियदर्शिनः।छ॥ महकायोअतिकायो महोरगेंदाहु भोगभोगवदी इदरस्स पुप्फ
गंधीअणिंदिता होंतिवल्लभिया।२६१॥ महाकायोऽतिकायश्चेति महोरगेंद्रौ। खलु भोगा
भोगवती पूर्वस्य इतरस्य पुष्पगंधी अनिंदिता भवतः वल्लभिके।छ॥ हाहाहूहूणारयतु
वुरुककदंबवासवक्खाय। महसरगीतरतीगीदजसा इदरवंतादसमा।छ॥ गीतरतीगी
तयसोमघविंदा हवंति वल्लभिया। सरसतिसरसेणावियणंदिणिपियदरिसिणादेवी।२६२॥
गीतरतिर्गीतयशा गंधर्वेंद्रौ भवतः। तयोर्वल्लभिकाः सरस्वतीस्वरसेनापि चनंदिनीप्रियद ४५
र्शिनादेवी।छ॥ अहमाणिपुण्णसेलमणोभद्दाभद्दगासुभद्दा य। तह सव्वभद्दमाणुसधण-
पालसुरूवजक्खाय।२६३॥ अथ माणिभद्र। पूर्णभद्र शैलभद्रमनोभद्राः। भद्रकः

सुभद्रश्च। तथा सर्वभद्रः मानुषः धनपालः सुरूपयक्षश्च॥छ॥ जक्खुत्तममणोहरणा
मातहमाणिपुण्णभद्देंदा बहुपुत्तदेवी। तारपुत्ता उत्तमादेवी॥२६५॥ यक्षोत्तमो मनोहरनामा।१२।
तत्रमाणिभद्रपूर्णभद्राविंद्रौ। तयोर्देव्यः कुंदा बहुपुत्रदेवी। तारापुनरुत्तमादेवी॥छ॥ भीममहा
भीमविग्घविणायकनहउदक रक्खसायनहा। रक्खसरक्खसतहबम्हरक्खसा होंति सत्तम
या॥२६६॥ भीमो महाभीमः विघ्नविनायकः तथा उदकः राक्षसश्च तथा राक्षसराक्षसः। त
था ब्रह्मराक्षसो भवति सप्तमकः।७। भीमो य महाभीमो रक्खसइंदा हवंति वल्लभिया। पउ
मा वसुमित्ता विय रयणड्ढा कणयपह देवी॥२६७॥ भीमश्च महाभीमो राक्षसेंद्रो भवतः। त
योर्वल्लभिका पद्मा वसुमित्रापि च रत्नाढ्या कनकप्रभा देवी॥छ॥ भूदाणं तु सुरूवा पडिरूवा
भूद उत्तमा तत्तो। पडिभूद महाभूदा पडिछन्ना गासभूद इदि॥२६८॥ भूतानां तु सुरूपः प्र
तिरूपः भूतोत्तमः ततः प्रतिभूतः महाभूतः। प्रतिछन्नः आकाशभूत इति॥७॥छ॥ इन्दा य सु
पडिरूवा वल्लभिया तह य होदि रूववदी। बहुरूवा य सुसीमा सुमुहा य हवंति देवीयो॥२६९॥
इन्द्रौ च सुरूप प्रतिरूपौ। तयोर्वल्लभिका तथा भवति रूपवती बहुरूपा च सुषुमा सुमुखा च
एता देव्यो भवंति।छ॥ कुंभंड रक्खपक्खा संमोहा तारका अ चोक्खा य। काल महकाल चोक्खा
सताल या देह महदेहा।२७०॥ कूष्मांडो रक्षा यक्षः संमोहः तारकः अशुचिश्च। कालः महा-
कालः शुचिः सतालकः देहः महादेहः॥छ॥ तुह्णिय पवयणणामा इंदा तेसिं तु कालमहकाला

कमलकमलप्पहुप्पलसुदरिसणा होंति वल्लभिया॥२७१॥ तूष्णीकः प्रवचननामा।१४। इन्द्रौ
तेषां तु कालमहाकालौ कमला कमलप्रभा उत्पला सुदर्शनिका एतास्तयोर्वल्लभिकाः। अथ
पुनरिन्द्रसंज्ञामेव पृथग्गृह्णाति गाथाद्वयेनाह॥ छ॥ किंपुरुस किंणरस प्पुरुस महापुरु
सणा मयाकमसो। महकायो अतिकायो गीत्तरती गीतयसणामा॥२७२॥ किंपुरुषः किंनरः
सत्पुरुषः महापुरुषनामा क्रमशः महाकायः अतिकायः। गीतरतिर्गीतयशोनामा॥ छ॥ तोमा
णिपुसभद्दाभीममहाभीमया सुरूवाय। पडिरूवो कालमहाकालो भोम्मेसु जुगलेंदा॥२७३॥
ततो माणिभद्रः पूर्णभद्रः भीमः महाभीमः सुरूपः अप्रतिरूपः कालो महाकालः एते सर्वे भौ
मेषु युगलेन्द्राः। अथ किंपुरुषादीन्द्राणां गणिकामहत्तरीर्गाथाचतुष्टयेन कथयति। छ॥ गणिकाम
हत्तरीयो रदंपडिपहलदलछिदीदो हो मधुरा मधुरालावा सुस्सरमउभासिणी कमसो।२७४॥ ग
णिकामहत्तर्यः इन्द्रं प्रति पल्यदलस्थितयः द्वेद्वे। मधुरालापा सुस्वरा मृदुभाषिणी क्रमशः॥ छ॥
पुरिसपिया पुंकंता सोमा पुन्दरिसिणीय भोगक्खा। भोगवदीय भुजंगा भुजंगपिया तो सुघोस वि
मलेत्ति॥२७५॥ पुरुषप्रिया पुंकान्ता सौम्या पुंदर्शिनी च। भोगाख्या भोगवती च। भुजंगा भुजंगप्रिया
ततः सुघोषा विमलेति। छ॥ सुस्सरअणिंदिदक्खा भद्द सुभद्दा य मालिणी होंति। पउमा दिम्मालि- ४६
णीवि य तो सव्वसिरि सव्वसेणोत्ति॥२७६॥ सुस्वरा अनिंदिताख्या। भद्रा सुभद्रा च मालिनी भवन्ति॥
पद्मा दिमालिन्यपि च। ततः शर्वश्रीः शर्वसेनेति। छ॥ रुद्दवरुद्ददरिसिणीभूदादी कंदभूदम्मदादी। द

त्तमहाभुजअंबाकरालसुलसासुदरिसणाया॥२७६॥इंद्राणामहिंद्रदर्शनाभूतकान्ताभूता।
भूतदत्ता। महाभुजा। अंबा। कराला। सुरसा सुदर्शना च। छ॥ अथ किंपुरुषादींद्राणां सामानि
कादीनां संख्याभेदमाह। छ॥ इंदसमा हु पडिंदा सामाणुतणुरक्खपरिसपरिमाणं च उ सोलस
हस्सं पुण अट्ठस्सयं विसदवट्टिकमो।२७७॥ इन्द्रसमाः खलु प्रतीन्द्राः सामानिकतनुरक्ष
पारिषद्प्रमाणं। चतुःसहस्रं षोडशसहस्रं पुनरष्टशतं मध्यमबाह्यपरिषदोः द्विशतवृद्धिक्र
मः। अथ तेषां सप्तानीकं कथयति। छ॥ कुंजरतुरयपदादीरहगंधव्वणच्चवसहेत्ति। सत्ते
वय आणीया पत्तेयं सत्त सत्त कक्खजुदा॥२७८॥ कुञ्जरतुरगपदातिरथगंधर्वनृत्यवृष-
भा इति सप्तैवानीकाः प्रत्येकं सप्त सप्तकक्षयुताः॥ अथ तत्र सेनामहत्तरभेदमाह। छ॥ सेणाम
हत्तरा सुजेट्ठो सुग्गीव विमल मरुदेवा। सिरिदामा दामसिरी सत्तम देवो विसालक्खो।२७९॥
सेनामहत्तराः॥ सुज्येष्ठः सुग्रीवः विमलः मरुदेवः श्रीदामा। दामश्रीः। सप्तमदेवो विशालाख्यः।
अथ तदानीकसंख्यामाह। छ॥ अट्ठावीससहस्सं पढमं दुगुणं कमेण चरिमोत्ति। सव्विंदाणं
सरिसा परूसया दीअसंखवमिदा॥२८०॥ अष्टाविंशतिः सहस्राणि प्रथमं प्रमाणं क्रमेण द्वि
गुणं चरमं प्रावत्॥ सर्वेंद्राणां सदृशाः आनीकसंख्याः चतुर्निकायेषु प्रकीर्णकादयः असं
ख्यातमिताः। छ॥ अथ व्यंतरेंद्राणां नगराश्रयद्वीपसंज्ञामाह॥ छ॥ अंजणकवज्जधाउकसु
वण्णमणिसिलकवज्जरजदे सु हिंगुलिके हरिदाले। दीवेभो म्मिंदणाय णाणि।२८१॥ अंज

नकवज्रधातुकसुवर्णमनः शिलकवज्ररजतेषु हिंगुलिके हरिताले द्वीपे। भौमेंद्रनगराणि।
अथ तन्नगरसंज्ञा मायामंचाह। छ॥ भोमिंदकंमखेपहकंतावत्तमस्सचरिमंका। पुव्वादिसु
जंबुसमा पणपणणयणणि समभागे।२८२॥ भौमेन्द्रः किंनरस्तेदेवांकंनघ्येपुरिस्त्रम-
कान्तावर्त्तमध्याः। भौमेंद्रांकुचरमांकाः पूर्वादिषु जंबूद्वीपसमानि पंचनगराणि समभागे।
अथ तन्नगरप्राकारद्वारयोरुदयादि भेदमाह। छ॥ तप्पायारुदयत्तियंपणहत्तरिप-
णवीस पंचदलं दारुदओ विस्थारे पंचघणद्धं तदद्धं च।।२८३।। तत्प्राकारोदयत्रयं पंचसप्त
तिदलं ७५/२ पंचविंशतितदालं २५/२ पंचदलं ५/२ तद्वारोदयो विस्तारश्च पंचघनार्द्धं।।
१२५/२ तदर्द्धं च ।।। १२५/४ अथ तदुपरिमप्रासादस्वरूपं निरूपयति। छ॥ तस्सु
वरिपासादो पदहत्तरितुंगओ सुधम्मसहा। पणकदिदलत्तद्दलणवदीहरवासुद
यको सओगाढा। २८४॥ तस्योपरिमप्रासादः पंचसप्ततितुंगः स एव सुधर्मसभा इत्याख्यायते पंच
कृतिदलं २५/२ तद्दलं २५/४ नव एते यथासंख्यं दीर्घव्यासोदयाः तदवगाढः कुट्टिमभूमिः
एकक्रोशः। अथ तत्प्रासादस्य द्वारोदयादीन्निरूपयति।।छ।। तिस्सेदारुदओ दुगइगि
वासो दक्खिणउत्तरिंदाणं। सेसेसिं णगराणं पायारादीणि सरसाणि।२८५॥ तस्याः सुधर्मस ४७
भायाः द्वारोदयः द्वियोजनं एकयोजनव्यासः। दक्षिणोत्तरेंद्राणां सर्वेषां नगराणां प्राकारादीनि
सदृशानि छ॥ अथ तन्नगरबाह्यवनस्वरूपं निरूपयति। छ॥ पुरदो गंतूण बहिं चओ हि संजोय

णाणि विसहस्सं। इगिलक्खायतदलवासजुदा रम्मवणसंडा॥२९६॥ पुरात् गत्वा ब-
हिश्चतसृषु दिशासु योजनानि द्विसहस्रैकलक्षायताः तदर्धव्याससयुता रम्यवनषंडाः॥
अथ तद्द्वीपस्थितगणिकानगरविस्तारसंख्यादिकं निरूपयति। छ। तस्सेव य गणिकाणं-
चुलसीदिसहस्सविच्छोलणयराणि। सेसाणं भोम्माणं अणेवदीवे समुद्दे य॥२९७॥ तत्रै
व द्वीपे गणिकानां चतुरशीतिसहस्रविपुलनगराणि शेषाणां भौमानां अनेकद्वीपे अने
कसमुद्रे च नगराणि। अथ कुलविशेषमवलंब्य निलयभेदमाह॥ छ॥ भूदाणरक्खसाणं
चउदससोलससहस्सभवणाणि। सेसाणं वेंतरदेवाणं उवरिणिलयाणि॥२९८॥ भूता
नां राक्षसानां चतुर्दशषोडश सहस्रभवनानि। शेषाणां व्यंतरदेवानां उपरि निल-
यानि। छ॥ अथ नीचोपपादादिव्यन्तरविशेषान् गाथाद्वयेनाह। छ॥ हत्थपमाणेण चुव
वादादिगुवासि अन्तरणिवासी। कुंभंडा उप्पण्णाणुप्पणा पमाणया गंधा॥२९९॥ हस्तप्रमा
णे नीचोपपादाः दिग्वासिनः अन्तरनिवासिनः कूष्मांडाः। उत्पन्नाः। प्रमाणकाः। गंधाः॥
छ॥ महगंधभुजगपीदिक आगासुववण्णगा य उवरुवरिं। तिसु दससहस्स सहस्सं। वीसस
हस्संतरं सेसे॥२९०॥ महागंधाः भुजगाः प्रीतिकाः आकाशोत्पन्नाश्च।१२। एते सर्वे उपर्यु
परि त्रिषु दशहस्तसहस्राणि अन्तरं। शेषे उत्पन्नादौ विंशतिहस्तसहस्राण्यंतरं। अथैते
षां नीचोपपादादीनां क्रमेणायुष्यमाह॥ छ॥ दसवरिससहस्सा दो सीदी चुलसीदिकं सहस्सं

तुपल्लदसमं तु पादं पल्लदं आउगं कमसो।२९१॥ दशवर्षसहस्रादारभ्य दशसहस्रोत्तरवृद्धिक्र
मेणाशीतिसहस्रपर्यन्तं ततश्चतुरशीतिसहस्राणि पल्यासंख्यभागं पल्यचतुर्थांशं पल्या
र्द्धमायुष्यं क्रमशः। अथ व्यन्तराणां निलयभेदमाह॥छ॥ वितरणिलयत्तियाणि य भवण
पुरावासभवणणामाणि। दीवसमुद्दे दहगिरितरुम्हि चेत्तावणीम्हि कमे।२९२॥ व्यन्त
राणां निलयत्रयाणि च भवनपुरं आवास भवनमिति नामानि रह कुत्र कुत्रेति चेत्॥ द्वीपस
मुद्रे। ह्रदगिरितरौ चित्रावन्यां च क्रमेण भवन्ति। अथ निलयत्रयं विवृणोति॥छ॥ उड्ढग-
पा आवासा अधोगया वितराण भवणाणि। भवणपुराणि य मस्सिमभागगयाइदि तियणि
लयं॥२९३॥ ऊर्द्धगताः आवासा अधोगता व्यन्तराणां भवनानि। भवनपुराणि च मध्यमलो
कगतानीति त्रयं निलयं॥ अथ सर्वेषां व्यंतराणां यथासंभवं निवासप्रदेशमुपदिशति॥
छ॥ चित्तवइराद जावय मेरुदयं तिरियलोयवित्थारं। भोम्मा हवन्ति भवणे भवणपुरावास
गे जोग्गे॥२९४॥ चित्रावज्रामध्यादारभ्य यावन्मेरूदयं यावत्तिर्यग्लोकविस्तारं तावति क्षे
त्रे भौमा भवन्ति स्वस्वयोग्ये भवने भवनपुरे आवासे च॥ अथ निलयसंक्रममावेदयति॥छ॥
भवणं भवणपुराणि य भवणपुरावासयाणि केसिंपि। भवणा मेरसुअसुरे विहाय केसिंति 
यणिलयं।२९५॥ केषांचित् भवनमेव केषांचिद्भवनं भवनपुरे च भवतः। केषांचित् भवनपुर
आवासकानि च भवन्ति भवनामरेषु असुरान्विहाय केषांचित् त्रयं निलयं। अथ निलयत्रयाणां

व्यासादिकं गाथात्रयेण कथयति॥छ॥ जेठावरभवणाणं बारसहस्सं तु सुद्धपणुवीसं।
बहलं तिसयतिपादं बहलतिभागुदयकूडं च॥२९६॥ जेष्ठजघन्यभवनयोर्विस्तारो द्वादश
सहस्रयोजनानि शुद्धपंचविंशतिः। तयोर्बाहल्यं त्रिशतयोजनानि त्रिपादयोजनं तयोर्म-
ध्ये तद्बाहल्यत्रिभागोदयकूटं चास्ति।छ॥ जेठभवणाणपरिदो वेदी जोयणदलुच्छिया
होदि। अवराणं भवणाणं दंडाणं पणुवीसुदया।२९७॥ ज्येष्ठभवनानां परितः वेदीयो-
जनदलोच्छ्रिता भवति। अवराणां भवनानां वेदी दण्डानां पंचविंशत्युदया।छ॥ वट्टादीण
पुराणं जोयणलक्खं कमेण एक्कं च। आवासाणं विसयाहियबारसहस्सयतिपादं।२९८॥
वृत्तादीनां पुराणां योजनलक्षमुत्कृष्टविस्तारः क्रमेण जघन्यमेकयोजनं तत्रादीनामा
वासानां द्विशताधिकद्वादशसहस्राण्युत्कृष्टविस्तारः जघन्यं त्रिपादयोजनं ३/४ अथ
निलयत्रयाणां विशेषस्वरूपं भौमहाभागे छ संचकथयति।छ।भवणावा- सादी
णं गोउरपायारणच्चणादिघरा भोम्माहरुस्सासासाहियपणादिणमुहुत्ताय॥२९९॥
भवनावासादीनां गोपुरप्राकारनर्तनादिगृहाणि भवंति। भौमाहारो छ सोयथाक्रमे
णसाधिकपंचदिनानि साधिकपंचमुहूर्त्तोच्छ्वा॥ इति व्यन्तरलोकाधिकारः समाप्तः॥छ॥
अथ व्यंतरलोकाधिकारं निरूप्य तदनंतरोद्देशभाजं ज्योतिर्लोकाधिकारं निरूपयितुका
मस्तदादौ ज्योतिर्विवसंख्याप्रदर्शनगर्भं ज्योतिर्लोकचैत्यालयं वरनालदाणं मंगल

माह॥छ॥ वेसदछप्पणंगुलकदिहिदपदरस्स संखभागमिदे। जोइसजिणिंदगेहे गण-
णातीदे णमंसामि॥३००॥ द्विशतषट्पंचाशदंगुलकृतिहृतप्रतरस्य संख्यातभागमिता
न्ज्योतिष्कजिनेंद्रगेहान् गणनातीतान्नमस्यामि। अथ तद्गेहस्थज्योतिष्कभेदमाह।
चंदा पुण आइच्चा गहरिक्खा पइण्णतारा य पंचविहा जोइगणा लोयंतघणोदहिं पुट्ठा
॥३०१॥ चंद्राः पुनरादित्या ग्रहा नक्षत्राणि प्रकीर्णकतारा श्चेति पंचविधा ज्योतिर्गणा
लोकांतघनोदधिं स्पृष्टवन्तः।छ॥ अथ द्वीपसमुद्रनिरूपणामन्तरेण ज्योतिर्गणनि
रूपणासंभवात् तदाधारद्वीपसमुद्रान् गाथाचतुष्केण निरूपयति।छ॥ जंबूधादकिपु
क्खरवारुणिखीरघदखोदवरदीओ णंदीसरअरुणअरुणब्भासवरकुण्डलो सं-
खो॥३०२॥ जम्बूद्वीपः धातकीखंडद्वीपः।पुष्करवरः वारुणीवरः।क्षीरवरः घृतवरः क्षौद्र
वरः।नंदीश्वरवरः अरुणवरः अरुणाभासवरः कुंडलवरः शंखवरः।छ॥ तो रुचग-
भुजगकुसगयकोंचवरादीमणस्सिला तत्तो। हरिदालदीवसिंदुरसियामगंजणय
हिंगुलिया॥३०३॥ ततो रुचकवरः।भुजगवरः कुशगवरः क्रौंचवरादयः एते अभ्यंतर ४९
षोडश द्वीपाः ततउपरि असंख्यातद्वीपसमुद्रान् त्यक्त्वा अन्त्यषोडश द्वीपानाह। त
तो मनःशिलाद्वीपः हरितालद्वीपः।सिंदूरवरः।श्यामवरः अंजनकवरः। हिंगुलिकवरः
रुप्पसुवण्णयवज्जयवेलुरियपणागभूदजक्खवरा तत्तो देवाहिंदवरा सयंभुरमणोह

वेचरिमो ॥३०४॥ रूप्यवरः सुवर्णवरः वज्रवरः वैडूर्यवरः नागवरः। भूतवरः। यक्षवरः ततो देवव
रः अहिन्द्रवरः। स्वयंभूरमणो भावेचरमः।छ॥ लवणं वुहि कालोदयजलहीतत्तो सदीवणा सुवही
सहिअद्धारज्जुद्धारुवहिमेत्तयाहोंति॥३०५॥ लवणांबुधिः कालोदकजलधिः ततः स्वस्वद्वीपना
मानउदधयः सर्वे द्वीपसमुद्राः कियंत इति चेत् अर्द्धतृतीयोद्धारसागरोपममात्राभवंति॥छ॥इ
दानीं तेषां विस्तारं संस्थानं च निरूपयति।छ॥ जंबूजोयणलक्खो वट्टोत दुगुणदुगुणवासेहिं॥
लवणादि दिपरिखित्तो सयंभुरमणुवहीयंतेहिं॥३०६॥ जम्बूद्वीपः योजनलक्षव्यासः वृत्तः त
द्विगुणद्विगुणव्यासैः लवणसमुद्रादिभिः परिक्षिप्तः परिवेष्टितः स्वयंभूरमणोदध्यंतैः॥छ॥
अथतत्राभिमतस्स द्वीपस्य समुद्रस्य वा सूचीव्यासं वलयव्यासं चानेतुं करणसूत्रमिदम्॥
रूऊणाहियपदमिददुगसंवग्गे गुणो विलक्खहदे गयणतिलक्खविहीणो वासोवलयस्स
सूइस्स॥३०७॥ द्वीपसमुद्राणामिष्टगच्छप्रमाणं कालोदके एकत्र रूपोनमन्यत्र रूपाधिकं
च कृत्वा स्थापनीयं॥३॥५॥ तद्द्वयमपि विरलयित्वा।१११।११११। रूपं प्रति द्विकं दत्वा २२२।२२२२।
अन्योन्यसंवर्गे इदमोराशीजायेते॥८॥३२॥ पुनर्लक्षेण हन्यात्।८ल।३२ल। तत्र प्रथमरा
शेः शून्यं विशोधयेत्। द्वितीयराशेः लक्षत्रयं विशोधयेत्। एवं कृते सति वलयव्यासः।८।ल॥
सूचीव्यासश्च जायते २९ल। अत्र वलयव्यासानयने वासना। तद्यथा। जंबूद्वीपव्यासात्।१ल।
अस्माल्लवणसमुद्रादिव्यासाः द्विगुणद्विगुणप्रमाणाभवंति। इति हेतोः रूपोनगच्छमात्र

त्रि·सा· द्विकेर्जंबूद्वीपव्यासेगुणितेतत्रतत्रेष्टस्थानेवलयव्यासोभवति।इदंमनसिकृत्यरूऊणप
५० दमिददुगसंवग्गेइत्युक्तं।इदंवलयव्यासप्रमाणंशुद्धमेवागतमितिन्यूनाधिकत्वाभावात्गय
णविहीणमित्युक्तं॥अथसूचीव्यासानयनेवासना।।इष्टस्यद्वीपस्यसमुद्रस्यवावलयव्यासंउभ
यदिग्गतमेलनात्।द्विगुणंस्थापयित्वा१६ल।तथातत्तोर्वाचीनानांद्वीपसमुद्राणांवलयव्यासंद्वि
गुणंद्विगुणंस्थापयेत्।८ल।४ल।जंबूद्वीपस्यदिग्द्वयाभावादात्मप्रमाणमेव१लस्थापयेत्।ततः

| | | |
|---|---|---|
| व्यासनांन्यासः | १६ ल | गुणसंकलनार्थः।अत्रद्वितीयस्थानेशून्येलत्तद्रूपमृणंप्रक्षिपेत्।एवंकृ |
| नेरूपाधिकग- | ८ ल<br>४ ल | तोत्पत्तिः भवति।इदंसंप्रधार्यरूवाहियपदमिददुगसंवग्गेत्युक्तं।अत्र |
| पदमेतेगुणय | ० | देइत्यनेनगुणसंकलनसूत्रेणरूपाधिकपदमात्रद्विकसंवर्गेणोत्पन्नरा |
| णावेकरूपंप्र | १ ल | कृत्वक्षिप्संरूपाद्वयंचापनयेत्।इदमेवावधार्यतिलक्खविहीणेइत्युक्तं॥ |

एवंकृतेइष्टस्थानेसूचीव्यासप्रमाणमुत्पद्यते।तथाभ्यन्तरमध्यमबाह्यसूच्यानयनेइदंकर
णसूत्रं।।छ।।लवणादीणंवासंदुगतिगचदुसंगुणंतिलक्खूणं।आदिममज्झिमबाहिरसूइत्ति
भणंतिआइरिया॥३०८॥ लवणसमुद्रादीनांमध्येइष्टस्यद्वीपस्यसमुद्रस्यवावलयव्यासंद्विसं
गुणंकृत्वातत्रलक्षत्रयेशोधितेअभ्यंतरसूचीप्रमाणंभवति।तथाहिविवक्षितवलयव्यासउभ ५०
यदिक्संजनितः।अर्वाचीनानांद्वीपसमुद्राणांउभयदिक्संजनितवलयव्यासपुनः सकाशात्
त्रिलक्षाधिकोयतस्ततःत्रिलक्षोनः उभयदिक्संजनितविवक्षितवलयव्यासः अभ्यन्तरसूचीप्र-

माणमित्यभिप्रायः। विवक्षितवलयव्यासं त्रिसंगुणं कृत्वा तत्र लक्षत्रये शोधिते मध्यमसूची
प्रमाणं भवति। तथाहि विवक्षितस्य द्वीपस्य समुद्रस्य वा वलयव्यासे द्विगुणितत्रिलक्षोना-
भ्यन्तरादाभ्यन्तरसूचीप्रमाणं भवतीत्यतस्तनः कारणात् तस्मिन्नभ्यन्तरसूचीप्रमाणे विव
क्षितवलयव्यासमध्यान्तर्दिग्द्वयगतस्य विवक्षितवलयव्यासप्रमाणस्याभ्यधिकत्वा
त् मध्यमसूचीप्रमाणं त्रिगुणितत्रिलक्षोनविवक्षितवलयव्यासप्रमितमिति भावः। विवक्षि
तवलयव्यासं चतुःसंगुणं कृत्वा तत्र लक्षत्रये शोधिते बाह्यसूचीप्रमाणं भवति। तथाहि।
यतो द्विगुणितत्रिलक्षोनविवक्षितवलयव्यासप्रमितेऽभ्यन्तरसूचीप्रमाणे विवक्षित
वलयव्यासस्य दिग्द्वयगतस्य प्रक्षेपणात् बाह्यसूचीप्रमाणमुत्पद्यते ततः कारणात् चतु
र्गुणितत्रिलक्षोनविवक्षितवलयव्यासप्रमिता बाह्यसूचीत्याचार्याभिप्रायः॥ अथोक्तसू
चीव्यासमाश्रित्य तत्तत्क्षेत्रबादरसूक्ष्मपरिधिं तद्बादरसूक्ष्मक्षेत्रफलं चानयति॥ छ॥
तिगुणियवासं परिही दहगुणविस्थारवग्गमूलं च। परिहिहदवासतुरियं। बादरसुहुमं
च खेत्तफलं॥ ३०८॥ त्रिगुणितव्यासो बादरपरिधिः। ३ ल। दशगुणविस्तारवर्गः॥ ० ॥
१ल१ल१० तस्मिन्मूले गृहीते सूक्ष्मपरिधिः योजन ३१६२२७। तच्छेषयोजनभागं ४८४४७१।
चतुर्भिः संगुण्य क्रोशं कृत्वा १९३७८८४ पूर्वभागहारेण ६३२४५४ भागे कृते क्रोशाः ३ तत्क्रोश
शेषं ४०५२२ सहस्रद्वयेन २००० संगुण्य दण्डान्विधाय ८१०४४००० प्राक्तनभागहारेण भक्ते तस्मि

नदंडाः ५ युः।१२८ तदंडशेषं ८९८८८८ चतुर्भिः हस्ते कृते ३५९५९२ भागाभावात् चतुर्वि
शत्यांगुलं कृत्वा ८६२९०२४८ प्राक्तनहारेण भक्ते तस्मिन् अंगुलानि युः।१३ तदंगुलशेषं
४७०७३४६ यावत् भागेन अपवर्तितं साधिकैकं तावत्भागेन तन्द्वारोपि ६३२४५४ इत्यपव
र्त्तिते चेत् द्वे भवतः एवं सति साधिकार्द्धं।।१।। भवति तत्योजनादिकं सर्वं सूक्ष्मपरिधिः स्थू
लपरिधिना ३ ल व्यास १ ल चतुर्थांशो २५००० हतो ७५।।८।। जंबूद्वीपस्य बादरक्षेत्रफलं स्यात्।। इ
दानीं योजनरूपसूक्ष्मपरिधिं। ल ३१६२२७ व्यासचतुर्थांशेन २५००० गुणयित्वा ७९०५६७५०००
अत्रैव क्रोशलक्षणसूक्ष्मपरिधिं क्रो ३ तेनैव २५००० संगुणय्य ७५००० चतुर्भागेन योजनं कृत्वा
१८७५० मेलयेत् ७९०५६९३७५० अत्रैव पुनर्दंडलक्षणसूक्ष्मपरिधिं १२८ तेनैव २५०००
संगुणय्य ३२००००० अष्टसहस्रभागेन योजनं कृत्वा ४०० मेलयेत् ७९०५६९४१५० अंगुललक्षणं सूक्ष्मपरि
धिं १३ १/२ समच्छेदेनान्योन्यं मेलयित्वा २७/२ द्वाभ्यां तिर्यगपवर्तित पंचविंशतिसहस्रेण १२५०० गु
णयित्वा ३३७५०० तस्मिन् क्रोशांगुलेन १९२००० भक्ते साधिकक्रोशो भवति एतत्सर्वं जंबू
द्वीपस्य सूक्ष्मक्षेत्रफलं स्यात्। एवमेव सर्वेषां द्वीपसमुद्राणां च स्थूलसूक्ष्मक्षेत्रफले चानेतव्ये। अ
थ जंबूद्वीपस्य सूक्ष्मपरिधेः सिद्धांकमुच्चारयति।।९।। जोयण सगदुगदुगछक्किगितिदयंति कोस मह ५१
दुगिदंडो। अहियलंदगुलतेरस जंबूए सुहुमपरिणाहो।।३१०।। योजनानां सप्तद्विद्विषडेकत्रयः त्रयः
क्रोशाः अष्टद्वीकेदंडाः अधिकदलानि त्रयोदशांगुलानि एतत्सर्वं जम्बूद्वीपस्य सूक्ष्मपरिधिप्रमा

रांभवति। अथ तत्क्षेत्रफलस्य सिद्धांकमुच्चारयति॥ रू॥ पणासमेक्कदालं णवछप्पणास सुसण
वसदरी। साहियकोसं च हवे जंबूदीवस्स सुहमफलं॥३११॥ पंचाशदेकचत्वारिंशन्नवषट्पंचाश
च्छून्यं नव सप्तति। साधिकक्रोशश्च भवेज्जंबूद्वीपस्य सूक्ष्मफलं। अथ जंबूद्वीपस्य परिधिमा
धारं कृत्वा विवक्षितपरिध्यानयने करणसूत्रं रदं॥ छ॥ जम्बूउभयं परिही इच्छियदीउवहिस्स र
संगुणिय जंबूवासविभत्ते इच्छियदीउवहिपरिहीदु॥३१२॥ जंबूद्वीपस्योभयपरिधी स्थूल ३ल॥
सूक्ष्म ३१६२२७ क्रो ३ दं १२८। अंगुल १३ भा ( १/२ ) ईप्सितद्वीपोदधिसूच्या लवणे ५ल। धातकीखं
डे १३ल। संगुणय्य १५लल। स्थू = । १५८११३ ९ल। सूक्ष्मजंबूव्यासविभक्ते १५ल। १५८११३९
ईप्सितद्वीपोदध्योः परिधी भवतः॥ इदानीमुभयक्षेत्रफलमानयति॥ रू॥ अंताइसूइजोगं
रुंदद्धगुणितु दुप्पडिकिच्चा। तिगुणं दसकरणिगुणं बादरसुहमं फलं वलये॥३१३॥ लवण-
स्यान्तादिसूच्योः ५ल। १ल योगं ६ल रुंद्रार्द्धेन। १ल गुणयित्वा ६लल द्विः प्रतिकृत्वा ६लल।
६लल एकं त्रिगुणितं १८लल। अपरं दशकरणिगुणितं चेत् ६लल ६लल १० बादरसूक्ष्मफले
भवतः स्थूल १८लल। सूक्ष्म १८९७३६६५९६१० वलये वृत्तक्षेत्रे॥ अथ जंबूद्वीपप्रमाणेन लव
णसमुद्रादीनां खंडान्यानयति।। छ॥ बहिरसूईवग्गं अब्भंतरसूइवग्गपरिहीणं। जम्बूवास
विभत्ते तत्तियमेत्ताणि खंडाणि॥३१४॥ बाह्यसूचीवर्गः २५लल अभ्यन्तरसूची १ल वर्ग १ल१
ल। परिहीनः २४लल। जंबूव्यासवर्गराशिना हृद्गात्मकेन १लल। विभक्तश्चेदागतानि ताव

ण्यात्र खंडानि।२४॥ अथ प्रकारान्तरेण खंडानयने गाथाद्वयमाह॥ छ॥ रूऊणसलावारस
सलागगुणिदे दु वलयखंडाणि। बाहिरसूइसलागा कदी तदंतारिवलाखंडा॥३१५॥ तत्तद्वल
यव्यासलक्षवाराः अत्र शलाका इत्युच्यंते। लवणेत तद्रूपोनशलाकाः १ द्वादशभिः १२ शला
काभ्यां च २ गुणिता २४ वलयखंडानि। बाह्यसूचीशलाकाकृतिरेव। २५। तदंताःखिलानि खं
डानि स्युः॥ छ॥ बाहिरसूईवलयव्वासेण चउगुणिदव्वासहदा। इगिलक्खवग्गभजिदा जं
बूसमवलयखंडाणि॥३१६॥ तत्तद्बाह्यसूचीपृथुवलयव्यासेन २ल ना ३ल चतुर्गुणितेन
८ल व्यासहता २४ ल ल एकलक्षवर्गे १ ल ल भक्ता २४ जंबूसमवलयखंडानि। एवं धात-
कीखंडादिष्वपि सर्वत्र प्राक्तनगाथापंचकविधानं ज्ञातव्यं। अधुनोदधीनां रसविशेषमाह। छ॥
लवणं वारुणितियमिदि कालदुगंतिमसयंभुरमणमिदि॥ पत्तेयजलसुवादा अवसेसा-
हेंति इक्खुरसा॥३१७॥ लवणसमुद्रः वारुणिवरक्षीरवरघृतवर इति त्रयश्चेति चत्वारः का
लोदकपुष्करवरौ अंतिमस्वयंभूरमणसमुद्र इति त्रयश्च यथासंख्येन प्रत्येकजलस्वादवः।
स्वनामानुगुणस्वादवः त्वर्थः। जलस्वादवः अवशिष्टाः असंख्यातसमुद्राः इक्षुरसस्वादवो भ
वंति। अथ तेषु जीवानां संभवासंभवौ सकारणमाह। छ॥ जलयरजीवा लवणे कालेयंतिमसयं ५२
भुरमणेय। कम्ममहीपडिबद्धे ण हि सेसे जलयरा जीवा॥३१८॥ जलचरजीवा लवणसमुद्रे
कालोदकसमुद्रे अंतिमस्वयंभूरमणसमुद्रे च कर्ममहीप्रतिबद्धत्वात् संति। शेषे पुनर्हि जल

चराजीवाः॥ अथस्थाननिर्देशेन समुद्रत्रयावस्थितमत्स्यानां देहावगाहनमाह। ह॥ लव
णादुगंतसमुद्देणदीमुहुवहिम्हिदीहणवदुगुणं। दुगुणं पणसयदुगुणं मच्छेवासुदयमद्द
कमं॥ ३१८ लवणाद्दिकेलवणकालोदकयोः अंत्यसमुद्रे च नदीप्रवेशमुखे उदधौ च समुद्र
मध्ये यथासंख्यं लवणोदके मत्स्यदैर्घ्यं नव ९ तद्द्विगुणं १८ कालोदके तयोर्द्विगुणं १८। ३६ स्व
यंभूरमणे पंचशतं ५०० तद्द्विगुणं १००० मत्स्यव्यासोदयौ तु तत्तद्दैर्घ्यार्द्धक्रमो भवतः॥ सांप्रतं
मनुष्यक्षेत्रेतरविभागस्य कर्मभोगभूमिविभागस्य च सीमानमानयतोः पर्वतयोः स्वरू
पं निरूपयन् तद्विभागमेव समर्थयितुं गाथात्रयमाह॥ ह॥ पुक्खरसयंभुरमणाणद्धे उत्तर
सयंपहा सेला। कुंडलरूचगद्दंव्व सव्वं पउवं परिविक्खत्ता॥ ३२०॥ पुष्करार्द्धे स्वयंभूरमणार्द्धे च
यथासंख्यं मानुषोत्तरस्वयंप्रभौ शैलौ भवतः। कुंडलरुचकार्द्धे मिव कुंडलार्द्धे कुंडलगिरिः रु
चकार्द्धे रूचकगिरिर्व्यवस्थः। एते सर्वे पर्वताः पूर्वस्वस्वाभ्यंतरद्वीपसमुद्रान् परिक्षिप्य
तिष्ठंति। ह॥ मणुसुत्तरोत्ति मणुसा मणुसुत्तरलंघसत्तिपरिहीणा। परदो परदो सयंप-
होत्तियजहण्णभोगावणीतिरिया॥ ३२१॥ मानुषोत्तरपर्वतपर्यन्तं मनुष्याः मानुषोत्तरलं
घनशक्तिपरिहीणाः अस्मात्परतः स्वयंप्रभाचलपर्यन्तं जघन्यभोगावनीतिर्यंचो भवंति॥
ह कम्मावणिपडिवद्धो वाहिरभागो सयंपहगिरिस्स वरस्रोगाहणा जुत्ता तसजीवा हंति
तस्येव॥ ३२२॥ कर्मावनिप्रतिवद्धो वाह्यभागः स्वयंप्रभगिरेः वरागाहनयुक्ताः त्रसजीवास्तत्रै

त्रि॰सा॰
५३

चभवन्ति। अथैतद्गाथापरार्द्धोक्तोत्कृष्टावगाहनमेकेंद्रियावगाहनपुरस्सरमाह॥ ॥ अधि
यसहस्सं वारस तिचउत्थेकं सहस्सयं पउमे संखेगोम्हिभमरे मच्छवरदेहदीहो दु॥३२३॥ साधि
कसहस्रयोजनानि द्वादशयोजनानि योजनत्रिचतुर्थं एकयोजनं सहस्रयोजनं च यथा
संख्येन पद्मे शंखे ग्रैष्मे सहस्रपर्याख्यत्रसविशेषः स्त्यर्थः भ्रमरे मत्स्यवरदेहदैर्घ्यं स्या
त्। अथ तेषामेव व्यासोदयौ कथयति॥ ॥ वासिगिकमले संखमुहदओ चउ पंच चरणमि
हगोम्हि। वासुदओ दिग्घद्धमत्तहल मलिएत्तिपाददलं॥३२४॥ व्यासः एकयोजनं कमल
नाले। तद्बाहुल्यं समवृत्तत्वात्तदेव। शंखमुखोदयौ चत्वारि योजनानि पंच भवन्ति चरणा
श्चतुर्थांशाः योजनस्य रहग्रैष्मे व्यासोदयौ दीर्घ्या। ३/४ ष्टमभागदीर्घो षोडशभागो। ३/३२ ३/६४
हीत्यादिना कमलस्य सर्वक्षेत्रफलं ७५० मानयेत्। अथ वासनारूपेण शंखस्य
मुरजक्षेत्रफलमानयति॥ ॥ आयामकदी मुहदलहीणा मुहवासअद्धवगाजुदा॥ विगु
णा वेहेण हदा संखावत्तस्स खेत्तफलं।३२५॥ एतावदुदय १२ मुखव्यासे ४ शंखे







एतावंन्मात्रे क्रोणे
मुखायामसमास




खंड




विक्षिप्ते संपूर्णा मुरजाकारो भवति
अर्द्धमध्यफलमिति कृते एवं भवति
द्वये कृते एवं




६५

अत्रैकखंडस्य क्षेत्रफलमानीयते। खंडितत्वादिदमर्द्धमृणं भवति २विवर्त्त-
भवर्गादष्टगुणकरणीवदस्य परिरयो ले दीत्यनेन एकखंडस्य मुख ४ भू- म्यो ८ र्द्ध-
गे मूलमयं क्षेत्रखंडनानुगुणेन गृहीत्वा

| १२ | १६ | २४ | ६४ |
|---|---|---|---|
| | २४ | | ४८ |

मुख [५/४/१] मूलशो-
धे [१६/२४] अष्टभिरपवर्त्तिते [२/३] भूमिमूलशेषे। [६४/४८] षोडशभिर-
प वर्त्तिते [४/३] तयोः सूक्ष्मपरिधीस्या तां




दं क्षेत्रबाहुल्यं ८ मध्य ४ पर्यन्तं खंडयित्वा प्रसारिते परिधिप्रमाणेन
तिष्ठति न तत्क्षेत्रं पुनः मुख ० भूमि ४ समासार्द्धं मध्यफलमिति वेधरूप
मध्यफलं साधयित्वा
स्थितक्षेत्रं गृहीत्वा चतु-
रस्रं तत्र खानपूरण-







तत्रत्योभयपार्श्व-
रस्ररूपेण संधिते
त्र्यकोणद्वयस्थितयोरेकैकरूपं
गृहीत्वा शून्यस्थाने निक्षिप्तेपि
सम्पूर्णं न भवतीति एतावन्ति रूणे




निक्षिप्ते संपूर्णं
भवति ऽऽऽ पार्श्व-
द्वयवर्त्ति त्रिकोण

त्रि· सा· क्षेत्ररहितशेषचतुरस्रक्षेत्रं एक

५४-५५ पेण निक्षिप्ते एवं॥

पेणानीते क्षेत्रे निक्षिप्ते एवं



ऽऽऽ स्योपरि एकस्मिन् विपर्य्यासरू

ऽऽऽ तस्योपरि रू

ऽऽऽऽ तस्योपरि रू

ऽऽऽ त्रे निक्षिप्ते ए

ऽऽऽ तृतीयांशं प्र



पित्वा त्रिधा

न् खंडत्रये

पेणानीते क्षे

वं। अत्रत्य

पृथक्स्याप

खंडितेसत्ये

एकभुजरू

वं तदपिति





वं अस्मि

पेण

र्यग्

स्था



संधिते

रूपेण

प्य संधि



सत्ये

दल

ते ए



र्यित्वा पार्श्वे सं

वं पुनरपि तिर्यग्रू



पेण द

लयित्वा पृथक्स्यापि

ते क्षेत्रद्वये एवं ३ अ त्रैक क्षेत्रं द्वितीयत्रकोण समानमिति। त

च्छेदात् लब्धं त्रिभागरहितवृहत्क्षेत्रं तिर्यग्रूपेण दलयित्वा पार्श्वे संस्थाप्य संधि ५४-५५

ते एवं तदपि पुनस्तिर्यग्रूपेण दलयित्वा ऊर्ध्वभागे संधिते सत्येवं।ऽऽऽऽ एवं समभु

जकोटौ सत्यां आयाम करोत्युक्तं तत् आयाम कृतौ १४४ वेधस्य (५/६) वेधं (५/६) दर्शयित्वा त्रय

मक्षणक्षेत्रफलं २ अधुनास्फेटयत इति हेतोः मुहदलहीनेत्युक्तं तत्र मुखदलसमक्ष
राहीनराशौ ।१४२।। क्षणाय दत्त्वा अवशिष्टक्षेत्रफलं [५ / ४] ४वेधसमं दर्शी
यित्वा अधुना संयुज्यत इति कृत्वा मुहवास अर्द्धवर्ग [२] जुरा इत्युक्तं।। त
त्र मुखव्यासार्द्धवर्गो युक्तराशिः।१४६।। एकसुरजखड [२] स्थित्वा वर्ति ।१४६।।
द्वयोस्तयाखंडयोः किमित्यागते न गुणाकाररूपेन गुणपतइति द्व ष्ठा वि गुणा इत्युक्तं ए
षद्विहतराशिः।२९२ वेधेन चतुर्भिरपवर्त्तितेन ।७३।५ हन्यत इति वेहेण हदा इत्युक्तं एत
द्धं खातकृते सर्वक्षेत्रफलं ३६५।। भवति।। त्रींद्रियचतुरिंद्रियपंचेंद्रियाणां खातफलं मु
जकोटिवेधा इत्यादिना नेतव्यं। एकेंद्रियादिखातफलानां अल्पबहुप्रदेशत्वज्ञापना
र्थमिह मुच्यते तत्रात्सल्यं त्रींद्रियखातफलं [२७ / ८१९८२] एकयोजनस्यैतावत्सं गुलेषु
७६८०००।। एतावतः [२७ / ८१९८२] किमिति संपा त्यघनरूपराशित्वात्तद्गुणा-
कारमपि घनरूपेणैव संख्याप्यांगुलं कृत्वा [२७ / ८१९८२] [७६८००० / ७६८००० / ७६८०००] तथैवैकां गु
लस्य सूच्यंगुलस्प्रदेशे एतावदंगुलानां किमिति सं पातेन सूच्यं
गुलं कृत्वा सूच्यंगुलस्य प्रमाणांगुलत्वात् व्यवहाररूपप्राक नांगुलानां प्र
माणांगुलकरणार्थं पंचशत ५०० व्यवहारांगुलानामेकस्मिन् प्रमाणांगुले एतावद्व्य
वहारांगुलानां [२७ / ८१९८२] [७६८००० / ७६८००० / ७६८०००] किमिति संपातं कृत्वा पंचशतषट्शून्यानि क्रं

त्रि॰सा॰ गुलगतखंड। शेषैरपवर्त्यतदंगुलानि। ७६८ । त्रिभिः संभेद्य। २५६।३। पणाहिं नवच कृत्वा
५६ तत्फलहारेण ८१९२। २। पणाद्दिमपवर्त्य ७६८ ८।। पंचघने २५६।३ न १२५ अवशिष्टां
गुले ७६८०००। अपवर्तिते एवं ६१४४ एषां २७।८।। ६१४४। ८१ परस्परगुणने घनांगुलस्य
६ गुणकारो भवति। अस्य गुणकारं सर्वं एकसंख्यातं कृत्वांतः। ६१।। एवं चतुरिन्द्रिय-
स्वात फलस्यकर्तव्यं तत्रैतावता ६१४४। सहतत्रस्य ८ भागहारे अष्टभिरपवर्तिते एवं ।।७
६८।। एषगुणकार ६५५३६। ७६८। ८१।३।। त्रींद्रियगुणकारात् संख्याताधिकमिति घ
नांगुलस्य संख्यातद्वयं गुणकारं कृत्वंतः। ६११। एवं द्वींद्रियस्य संख्यातत्रयं ६१११। ए
केंद्रियस्य संख्यातचतुष्टयं ६११११ पंचेंद्रियस्य संख्यातपंचकं घनांगुलस्य गुणका
रं कृत्वंतः। ६१११११ एवमुत्कृष्टावगाहप्रसंगे एकेंद्रियादीं विशेषणविशिष्टानामुत्कृ
ष्टजघन्यस्थितिप्रतिपादनार्थं गाथात्रयमाह।। सुद्धखरभूजलाणं बारस बावीस
सत्त य सहस्सा तेउति य दिवसत्तिय सहस्सतिय दस य जेट्ठाऊ।।३२६।। शुद्धखरभूज
लानामायुर्ज्येष्ठं यथासंख्यं द्वादशवर्षसहस्राणि द्वाविंशतिवर्षसहस्राणि सप्तवर्षस
हस्राणि तेजस्कायेते जो वात वनस्पतिकायिके यथासंख्यं दिवसत्रयं। सहस्रवर्षत्रयं ५६
दशवर्षसहस्राणि ज्येष्ठमायुः।। वासदिणमासवारसंमुगुवणं कुक्कविपलजेट्ठाऊ
मच्छाणपुव्वकोडीरणवपुव्वंगा सरिसपाणं।।३२७।। वर्षदिनमासाः द्वादश १२ एकोन पंचा

त्४८ बद्धाः ६ विकलेंद्रियाणां यथासंख्यं ज्येष्ठमायुः मत्स्यानां पूर्वकोटिः नवपू
र्वांगानि नवगुणितचतुरशीतिलक्षवर्षाणि त्वर्थः सरीसृपाणां ॥ छ ॥ बावत्तरिवा
दालसहस्समाणाहिपक्खि ४ उरगाणं । अंतोमुहुत्तमवरं कम्ममहीणरतिरिक्खाऊ ।
३२८ ॥ द्वासप्ततिः द्वाचत्वारिंशत्सहस्रप्रमितानि पक्षिणां सुरगाणां च । अन्तर्मुहू
र्तमवरमायुः शुद्धभुवादीनां सर्वेषां कर्ममहीनरतिरश्चां । अथ प्रागायुष्यं निरूप्ये
दानीं तेषामेव वेदगतविशेषं निरूपयति । छ ॥ णिरइगिविगला संमुच्छणपंचक्खा य
होत्ति संढा हु । भोगसुरा संढूणा तिवेदगा गब्भणरतिरिया ॥ ३२९ ॥ नारका एकेंद्रियाः
विकलत्रयाः सम्मूर्छनपंचेंद्रियाश्च भवंति षंढाः । खलु भोगभूमिजाः सुराश्च षंढ
वेदेनोनाः त्रिवेदगा गर्भजनरतिर्यंचः । एवं प्रासंगिकानुषंगिकार्थं प्रतिपाद्येदा
५० नीं प्रकृतार्थं ताराद्रिस्थितिनिरूपणं गाथात्रयेण निर्दिशति । छ ॥ णउदुत्तरसत्तसयदस
सीदीचदुदुगे तियचउक्के तारिणससिरिक्खबुहा सुक्कगुरुंगारमंदगदी ॥ ३३० ॥ चि
त्रातः आरभ्य नवत्युत्तरसप्तशतयोजनानि तत उपरि दशयोजनानि । ततः अशीतियोज
नानि ततश्चत्वारि चत्वारि योजनानि द्विस्थाने ततस्त्रीणि त्रीणि योजनानि चतुःस्थाने गत्वा यथासंख्ये
न ताराः । इनाः । शशिनः । ऋक्षाणि । बुधाः शुक्राः गुरवः अंगाराः । मंदगतयश्च तिष्ठंति । छ ॥ अवसेसा
णगहाणं णयरीओ उवरि भिन्नभूमीदो । गंतूण बुहसणीणं विच्चाले होंति णिच्चाओ ॥ ३३१ ॥ अ

त्रि·सा· वशिष्टानांग्रहाणां।।३३१।। नगर्यः उपरि चित्राभूमितो गत्वा बुधशनैश्चरयोर्विचालेऽन्तराले भवंतीति
५७ स्वाः।। छ।। अडदरसीणाणवसये चित्तादो तारगा वितावदिस।। जोइसप—लबहलं दनिसहियं जोय
णाणसयं।।३३२।। आस्लेशनिनवशतयोजनानि चित्रातः तारका अपि तावन्नवश—ग्राजनप-
र्यन्तं निष्ठंति। ज्योतिष्कपटलबाहल्यं दशसहितं योजनानां शतं।। छ।। अथ प्रकीर्णकतारकाणां त्रि
विधमन्तरं निरूपयति।। छ।। तारंतरंजहण्णं तेरिच्छे कोससत्तभागो दु पण्णासं मज्झिमयं सहस्समु
क्कस्सयं होदि।।३३३।। तारकायाः सकाशात्तारकान्तरं जघन्यं तिर्यग्रूपं क्रोशसप्तमभागः
पंचाशद्योजनानि मध्यमांतरं योजनसहस्रमुत्कृष्टान्तरं भवति। इदानीं ज्योतिर्विमान—
स्वरूपं निरूपयति। छ।। उत्ताणट्ठियगोलकदलसरिसा सव्वजोइसविमाणा। उवरिं सुरणय·
राणि य जिणभवणा जुदाणि रम्माणि।।३३४।। उत्तानस्थितगोलकदलसदृशाः सर्वज्योतिष्कवि
मानाः तेषामुपरि सुरनगराणि च जिनभवनयुतानि रम्याणि। अथ तेषां विमानव्यासं बाहल्यं च
गाथाद्वयेनाह।। छ।। जोयणमेकट्ठिकए छप्पण्ण उदाल चंदरविवासं। सुक्कगुरिदरतियाणं कोसं किं
चूणकोसं कोसद्धं।।३३५।। एकयोजने एकषष्ठिभागे कृते तत्र षट्पंचाशद्भागाः। अष्टचत्वारिंश ५७
द्भागाश्च क्रमेण चंद्रारविविमानव्यासौ भवतः शुक्रगुर्वोरितरत्रयाणां। बुधमंगलशनीनां विमान·
व्यासः क्रोशः किंचिन्न्यूनक्रोशः क्रोशार्द्धं च स्यात्। छ।। कोसस्स तुरियमवरं तुरियद्धियकमेण जा
व कोसोत्ति। ताराणं रिक्खाणं कोसं वहलं तु वासद्धं।।३३६।। क्रोशस्य चतुर्थांशः अवरो व्यासः तुर्याधि

कक्रमेण यावदेकः क्रोशो भवति तत्रार्द्ध 1/2 त्रिचरण 3/4 क्रोशो मध्यमो एकक्रोशः उत्कृष्टता
राणां। ऋक्षाणां विमानव्यासः क्रोशः। सर्वेषांवा ह्रत्स्वस्वव्यासार्द्धं। अथराहुरिष्टग्र
हयोर्विमानव्यासं तत्कार्यं तदवस्थानं च गाथा द्वयेनाह॥ ॥ राहुअरिट्ठ विमाणा किंचूणं जो
यणं अधोगन्ता। छम्मासे पव्वंते चंदरवी छादयंति कमे॥ ३३७॥ राहुरिष्ट विमानौ किंचिन्न्यून
योजनव्यासौ चन्द्ररव्योरधो गंतारौ षण्मासे पर्वांते - द्ररवी छादयतः क्रमेण। ॥ राहुअरिट्ठ
विमाणधयादुवरि पमाणअंगुलचउक्कं। गंतूण ससिवि - माणा सूरविमाणा कमे होंति॥ ३३८॥
राहूरिष्टविमानध्वजदंडादुपरि प्रमाणांगुलचतुष्कं गत्वा शशि - मानाः सूर्यविमानाश्च
क्रमेण भवंति॥ अथ चंद्रादीनां किरणप्रमाणं तत्स्वरूपं चाह। ॥ चदिणबारससहस्सा पादा
सीयलखरा य सुक्के दु। अड्ढाइज्जसहस्सा तिव्वा सेसा हु मंदकरा॥ ३३९॥ चंद्रादित्ययोर्द्वादशसह
स्राः पादाः कराः शीतलाः खराः उष्णाश्च शुक्रे त्वर्द्धतृतीया २५०० सहस्राः तीव्राः प्रकाशेनोज्ज्व-
लाः शेषास्तु मंदकराः मंदप्रकाशाः॥ अथ चंद्रमंडलस्य वृद्धिहानिक्रममावेदयति। ॥ चं
दो सोलसमं किं एहासुक्को य पसरदि णोत्ति। हेट्ठिल्ल णिच्चराहू गमणविसेसेण वा होदि॥
३४०॥ चंद्रः निजषोडशभागमभिव्याप्य कृष्णः शुक्लश्च भवति पंचदशदिनपर्यन्तं। षोडशकला
नां १६ मेतावति बिंबक्षेत्रे 56/61 एककलायाः किमिति संपात्याष्टाभिरपवर्त्य गुणिते एवं 7/122
एककलायाः एतावति क्षे त्रे 7/122 षोडशकलानां १६ किमिति संपात्य द्वाभ्यामपवर्त्य

त्रि·लोसा· गुणितेएवं [५६ ६१] आचार्यांतराभिप्रायेणाधस्तननित्यगहुगमनविशेषेणाभवति।अथचन्द्रादीनांवि
५८ मानवाहककेद् वानामाकारविशेषंतत्संख्यांचाह।ळ॥ सिंहगजवृषभजटिलाश्वाकारसुरावहंतितद्वि
मानपूर्वादिकंतत्संख्यांइंदुरवीणांषोडशसहस्राणितदर्द्धार्द्धक्रममितरत्रयेग्रहनक्षत्रतारकारू
पे।अथाकाशेचरतांकियन्नक्षत्राणांदिग्विभागमाह॥ळ॥ उत्तरदक्खिणउड्ढधोमज्झेअभिजि
मूलसादीय।भरणीकित्तीयरिक्खाचरंतिअवणंतामेवतु॥३४२॥ उत्तरदक्षिणोर्द्धाधोमध्येयथा
संख्यंअभिजित्मूलस्वातिभरणीकृत्तिकाख्यनक्षत्राणिचरंति।अवणांतेत्रान्तरगतानामभि
जिदादिपंचानामेवमेवावस्थितिः।अथमन्दरगिरेः कियद्दूरंगत्वाकथंचरंतीत्यारेकायामाह।ळ॥
इगिवीसेयारसयंविहायमेरुंचरन्तिजोइगणा।चंदितियंवज्जित्ता सेसाहुचरंति एक्कपहे॥३४३॥
एकविंशत्युत्तरैकादशशतानियोजनानिमेरुंविहायचरंतिज्योतिर्गणाः चंद्रादित्यग्रहाइतित्रयं
वर्ज्जयित्वाशेषाःखलुचरंत्येकस्मिन्पथिइदानींजंबूद्वीपमारभ्यपुष्करार्द्धपर्यन्तंचंद्रादित्यप्रमा
णांनिरूपयति।ळ॥ दोदोवग्गंबारसवादालबहत्तरिंदुइणसंखा।पुक्खरदलोत्तिपरदोअवट्ठिया
सव्वजोइगणा॥३४४॥ जंबूद्वीपादारभ्यद्वौद्विवर्गोद्वादशद्वाचत्वारिंशत्।द्वासप्ततयः यथासंख्यमिं
दुइनानांसंख्यापुष्करस्थानस्थितादलंयावत्।ततः परतः अवस्थिताः सर्वेज्योतिर्गणाः॥अथतत्रस्थि ५८
तस्थिरताराणिरूपयति।ळ॥ ळक्कूदिणवतीससपंदसयसहस्संखवारइगिदालं।गयणतिदुगतेवण्णं
खिलताराणपुक्खरद्दलोत्ति॥३४५॥ षट्कृतिः३६नवत्रिंशदुत्तरशतं१३९दशोत्तरसहस्रं१०१०खद्वादशो

त्रैकचत्वारिंशत्सहस्राणि ४११२०। गगनत्रिद्विकोत्तरत्रिपंचाशत्सहस्राणि ५३२३०। स्थिरता
राः पुष्करार्द्धपर्यन्तं॥ अथ ज्योतिर्गणानां चारक्रमं विचारयति। छ॥ सगसगजोइगणद्धं एक्के भा
गम्हि दीवउवहीणं एक्कभागे अद्धं चरंति पंतिक्कमेणेव॥३४६॥ स्वकीयस्वकीयज्योतिर्गणार्द्धं ए
कस्मिन् भागे द्वीपोदधीनां एकस्मिन् भागे अर्द्धं चरन्ति पंक्तिक्रमेणैव॥ अथ मानुषोत्तरात्परतश्चंद्रा
दित्यानामवस्थानक्रमं निरूपयति॥ छ॥ माणुसुत्तरसेलादो वेदियमूलादु दीवउवहीणं। पण्णास
सहस्सेहि य लक्खे लक्खे तदो वलयं॥३४७॥ मानुषोत्तरशैलात् द्वीपोदधीनां वेदिकामूलाच्च पं
चाशत्सहस्रयोजनानि गत्वा वलयं भवति। ततः परं लक्षलक्षयोजनानि गत्वा वलयानि भवंति
अथ तेषु वलयेषु व्यवस्थितानां चंद्रादित्यानां संख्यामाख्याति॥ छ॥ दीवड्ढपढमवलये चउदाल
सयं तु वलयवलयेसु। चउ चउ वड्ढी आदी आदी दो दुगुणा दुगुणकमा॥३४८॥ मानुषोत्तराद्बहिः स्थितः
पुष्करद्वीपार्द्धप्रथमवलये चतुश्चत्वारिंशदुत्तरशतं १४४। ततउपरि वलयवलयेषु चतुश्चतुःसो
वृद्धयो भवंति॥ १४८। १५२। १५६। १६०। १६४। १६८। १७२॥ उत्तरोत्तरद्वीपस्य समुद्रस्य वा आदिः प्रथमप्र
थमस्य द्वीपस्य समुद्रस्य वा प्राक्तनवलयस्यादितः द्विगुणद्विगुणक्रमः॥२८८॥ छ॥ अथ तत्त-
द्वलयव्यवस्थितचंद्रचंद्रान्तरं सूर्यसूर्यान्तरं च निवेदयति। छ॥ सगसगपरिधिं परिधिगरविंदुभजि
दे दु अंतरं होदि। सुसम्हि सद्ध सूए द्वियाहु चरापक्क अभिजिम्हि॥३४९॥ स्वकीयस्वकीयसूक्ष्मपरिधौ प
रिधिगतरवींदुप्रमाणेन भक्ते सति अन्तरं भवति। तत्रतावज्जंबूद्वीपादारभ्योभयभागगततद्वी

त्रि·सा· पसमुद्रवलयव्यासमेलनसंजातद्वितीयपुष्करार्द्धप्रथमवलयसूचीव्यासस्य ४६००००० ।
५९ विष्कंभवर्गोत्यादिनापरिधिमानीय १४५४६९७७ तस्मिन्नत्परिधिगतरवींदुप्रमाणेन १४४ ।
भक्ते विंबसहितांतरं चंद्रादित्यानां १०१०१७ शेषं ॥ २९/१४४ ॥ विंबरहितांतरानयने विंबसहितां
तरलब्धादेकमपनीय । १०१०१६ शेषेण २९/१४४ स र्व समच्छेदं कृत्वा १४४/१४४ तच्छेषे मेलयि
त्वा १७३/१४४ अनेन सह चन्द्रविंबं । ५६/६१ । सूर्यविंबं वा । ४८/६१ परस्पर- हारगुणाने स
म १४४ छेदं कृत्वा शेषं । १०५५३/८७८४ चंद्र । ८०६४ । सूर्य ८७८४ स्मिन् चंद्रविंबे अपनीते । २४८९/८७८४ ।
सूर्यविंबे अपनीते ३६५१/८७८४ विं बरहिते चंद्रसूर्यांतरं स्यात् । पुष्पे सर्वे सू
र्याः स्थिताः । चंद्राश्च अभिजिति स्थिताः अथासंख्यातद्वीपसमुद्रगतचंद्रादिसंख्यानय
नेगच्छमानयन् तत्कारणभूतासंख्यातद्वीपसमुद्रसंख्यां गाथाष्टकेनाह । रज्जूदलिदे मंदर
मज्झादो वरिमसायरंतोत्ति । पडदि तदद्धे तस्सदु अब्भंतरवेदियापरदो ॥३५०॥ रज्जूदलने कृते
सति मंदरमध्यतः आरभ्य चरमसागरांतं यावत्तावद् गत्वा पतति तस्यां पुनरपि द्वितीयांतं स
चरमसागरस्याभ्यन्तरवेदिकापरतः । दसगुणपणात्तरिसयजोयण त्तरिसयजोयणमुवगम्म
दिस्सदे जम्हा । इगिलक्खहिओ पक्खो पुव्वगसव्वुवहिदीवेहिं ॥३५१॥ दशगुणपंचसप्ततिशतं ७५००० ५८
योजनमुपगम्य रज्जुर्दृश्यते कुत इति चेत् यस्मात्कारणात् पूर्वस्थितेभ्यः सर्वोदधिद्वीपेभ्यः स
काशात् उत्तरः एकः कश्चिद्द्वीपः समुद्रो वा एकलक्षाधिकः एतदेव स्पष्टीकरोति एकं । ३२ल । स्वयंभू

रमणं संकल्प्य जंबूद्वीपगतार्द्धलक्षसहितं सर्वद्वीपसमुद्रवलयव्यासांकं ५०००००। २ल। ४ल। ८ल।
१६ल॥ ३२ल। इत्यादि मेलयित्वा ६२५००००। अर्द्धीकृते ३१२५००० द्वितीयवारछिन्नरज्जुप्रमाणं।
तस्मिन् तस्मात्प्राक्तनसर्ववलयव्यासे ३७५०००० न्यूने सति तदभ्यंतरवेदिकापरतो गत्वाप
तितरज्जुप्रमाणं स्यात्। ७५०००० तस्मिन्नर्द्धिते पि ३१२५०००॥ अर्द्धिते १५६२५०० तृतीयवार-
छिन्नरज्जुप्रमाणं स्यात्। तस्मिन् तस्मात्प्राक्तनसर्ववलयव्यासे १८७५००० अपनीते सति त
दभ्यन्तरवेदिकापरतः पतितरज्जुक्षेत्रफलप्रमाणं स्यात्। ३१२५०० एवमेव तत्प्राक्तना
र्द्धमार्द्धीकृत्य तस्मिन् तस्मात्प्राक्तनसर्ववलयव्यासमपनीय तत्तदभ्यन्तरवेदिकापरतः पति
तरज्जुक्षेत्रप्रमाणं ज्ञातव्यं। छ॥ पुण रविछिण्णे यद्धिमदीव समंतरिमवेदियापरदो। सगदल
ज्जुदपण्णत्तरिसहस्समोसरिय णिवडदि सा॥ ३५२। द्वितीयवारछिन्नरज्जुं ३१२५००० पुनर-
पि छिन्नायां सत्यां १५६२५०० पश्चिमद्वीपाभ्यंतरवेदिकापरतो गत्वा स्वकीयदल ७८१२५०
युक पंचसप्ततिसहस्र ७५००० मपसृत्य निपतति सा रज्जुः। दलिदे पुण तदणंतरसायर
मब्भंतरत्थवेदीदो। पउदिसदलचरणाणि अवसरिदूण निपतदि सा॥ ३५३॥ तस्मिन् तृतीयवा
रछिन्नखंडे १५६२५०० दले ७८१२५० पुनस्तदनंतरसागराभ्यंतरस्थवेदिकापरतः पतति
स्वकीयदल ७८१२५० चतुर्थांशाभ्यां १९५३१२ अन्वितपंचसप्ततिदशशतिरचाशतं १३१२५०।
गत्वा॥ छ॥ इदि अब्भंतरतदो सगदलतुरियहमादिसंजुत्तं॥ पणसत्तरिसहस्सं गंतूण पडेदि

सातवा।३५३।। इतिअभ्यन्तरतः ततः आरभ्य स्वकीयदलं ७५००० / २ तुर्यां ७५००० / २।२। षमा।
७५००० / २।२।२ षंडेो स्संयुक्तं पंचसप्ततिसहस्रं आदिशाद्वात् षोउ शांशा द्वात्रिंशां
७५००० / २।२।२।२ शा ७५००० / २।२।२।२ षड्हीर्द्द क्रमेण गत्वा पतति सा रज्जुस्तावत् यावदेवम
र्द्धार्द्धक्रमे लोकयोजनमुद्धरति ते पंचसप्ततिसहस्रछेदा इयंतः।।
१७ उद्धरिनेकयोजनमंगुलं कृत्वा ७६८००० यावदेकांगुलमुद्धरति तावत्ते यंगुलेषुच्छिन्नेषु
इयंत छेदा १८ तान्छेदात् सर्वान्।१७।१८।। संख्यातं कृत्वा पुनः संख्यातं अवशिष्टेकांगुलं
सूच्यंगुलं कृत्वा तस्य छेदेषु।।छे छे।। मिलितमिति।।छे छे।। मनसि धृत्वा संखेज्जरूवसंजु
देति गाथामाह।छ।। संखेज्जरूवसंजुदसूईअंगुलछिदिप्पमाजाव। गच्छंति दीवजलही-
पडंदि तदो सा रज्जुलक्खेवण।।३५४।। संख्यातरूपसंयुतसूच्यंगुलछेदप्रमाणं यावत्तावद्गच्छं
ति ते द्वीपजलधयः। तत्छेदसमासो।। ततः परं सर्वेषु द्वीपोदधिषु सार्द्धलक्षमेव गत्वा
गत्वा पतते।। एतत्कथमिति चेत्। अन्तधरां ७५००० गुणकारगणितं १५०००० आदिविहि-
णां १५०००० रूऊण जरभजियं इति कृते भवति।७५००० ७५००० / २ १६ ७५००० / २५ ८ एवंसार्द्धलक्ष
क्रमेणैव लवणसमुद्रपर्यन्तमसंख्यातद्वीपसमुद्रं गत्वा। ।छ।। लवणोदुप ९०
डिरेक्कं जंबूपदेन्नमादिमा पंचदीउदही मेरुसलायपडंतु वजोयणाछचेदे।।३५५।। लवणस
मुद्रेद्विः छेदः पतितः तत्रैकं जंबूद्वीपे द्वे हि तत्र छेदे आदिमाः पंचद्वीपोदधिछेदाः मेरुशलाकाच

षड्ते प्रकृते ज्योतिर्बिंबानयने उपयोगिनो न भवंतीत्यत्रैऽपनेष्यंते कुत्रेति चेदाह॥ ३६॥ तिप
हीणासेढिछेदणमेत्तो रज्जुच्छिदी हवे गच्छो। जंबूदीवच्छिदिणो रूवजुदेणापरिहीणो॥ ३५६॥
त्रिहीनश्रेणिच्छेदनमात्रो छे छे छे ३ रज्जुच्छेदः तस्मिन् जम्बूद्वीपस्याभ्यन्तरे बहिश्च पंचा
शत्संचाशत्सहस्राणि इति मिलित्वा एकलक्षयोजनानि॥ तेषां छेदान् १७ तद्गतांगुल ७
६८००० छेदान् १९ मेरुमध्ये कछेदं च मिलित्वात् न सर्वमेक ७ संख्यातं कृत्वा तेन ७ सहित
सूच्यंगुलछेदान् छे छे अपनयन त्रैराशिकविधिरिति चेत्। एतावत्। प्र = छे छे ३ गुणकारं प्रद
र्श्यय दि गुणए। छे। एकं॥ फ = १। रूपमपनीयेत्। एतावत् ३। छे छे। गुणकारं प्रदर्श्य किय द प-
नीयते॥ इति त्रैराशिकेन फलगुणितामिच्छां प्रमाणेन विभज्य गुणकारः। छे छे भागहार-
योः छे छे ३ पल्यछेदवर्ग पल्यछेदवर्गेण सदृशं प्रदर्श्य अधस्तनं। छे छे ३ यावद्भागेनैकं
उपरितनं छे छे॥ तावद्भागेन साधिकैकमित्यपवर्त्य १/३ एतद्रज्जुछेदस्य गुणे छे छे छे ३॥ अ
पनयेत् छे | छे छे ३ इदमेव द्वीपसमुद्राणां संख्या भवति। इदानीं प्रकृतमनुसंधयति॥ जं
बूद्वीप ७४/५ छेदेन षड्रूपयुक्तेन छे छे परिहीनो रज्जुछेद एव समस्तद्वीपसमुद्रगतचं
द्रादित्य प्रमाणानयने गच्छो भवति॥ अथ तज्ज्योतिर्बिंबसंख्यानयनगच्छस्यादिमाह॥ ३६॥
पुक्खरसिंधुभयधणं चउघणगुणसय कहतरीए भजिदं। चउगुणपचयो रिणमवि अउकदिमुहमुवरि-
दुगुणकमं॥ ३५७॥ पुष्करसमुद्रस्य पूर्वापरधनमानेतव्यं। कथमिति चेत्॥ आदौ आदौ द्विगुणांक मे- ४उगुण१

त्रि·सा· त्तिन्यायेनपुष्करोत्तरार्द्धस्यादितः॥१४४॥ पुष्करसिंधोरादिर्द्विगुणो।१४४।२।भवतितंमुखंकृत्वा।
६१ पद३२हतमुखं१४४।२।३२।मुखस्थितेनद्विकेनपदं३२गुणयित्वास्थापिते१४४।६४आदिधनं
स्यात्व्येकपद।३१।अर्द्ध ३१/२ प्रचय ३१/२ ४ गुणोगच्छः ३१/२ ४।३२।अत्राधनस्तनद्विकमुपरितन
चतुष्केनापवर्त्यअवशि ष्टद्वि केनपदेगुणि तेएवं।३१॥६४अस्मिन्नुत्तरधनेऋण
निक्षेपार्थंउत्तरधनगतगुणकारस्यच३१।६४॥ऋण१।६४गुणकारं६४सदृशंप्रदर्श्य१।६४।
आत्मप्रमाणेकरूपंऋणंनिक्षिप्य३२।६४।इदमप्यादिधने।१४४।६४।तथासादृश्यंप्रदर्श्य
चतुरुत्तरचत्वारिंशच्छतरूपे१४४।।६४।।आदिधनगुणेद्वात्रिंशद्रूपोत्तरधनगतगुणे३२।
६४॥मिलितेसतिचतुर्धनगुणितानषट्पञ्चाशदुत्तरशतरूप१७६।६४।पुष्करसिंधुभयधनमेव-
ज्योतिर्विमानप्रमाणगच्छस्यप्रभवः स्यात्।एवमुत्तरत्रवारुणीवरद्वीपादिषुसर्वत्रप्राक्तना
दितः१४४।२।द्विगुणक्रमेणस्थितंमुखं।१४४।२२।।पदहतंकृत्वा१४४।२।२।६४।द्विकद्वयम
न्योन्यंसंगुण्यचतुःषष्टिरग्रेस्थापितेआदिधनं१४४॥६४।४।१।व्येकपदेत्यादिनाउत्तरधनम
प्यानीय ६३/२ ४।६४।तस्मिन्नपवर्त्तितद्विकंचतुःषष्टिरग्रेसंस्थाप्य६३।६४।२॥अत्रैतदृणका
रगुणिते ॥६४।२। करूपंऋणं।६४।२।निक्षिप्यसर्वत्रचउपरणगुणस्यच्छहननेणभवति ६१
तच्चमित्येतदर्थंद्वात्रिंशदवशिष्यतेयथातथासंभेदयतद्विकेनपूर्वद्विकंसंगुण्य३२।६४।६४।४॥
आदिधन१४४।६४।४।उत्तरधनयोः३२।६४।४॥मेलने।१७६।६४।४।चतुर्गुणप्रचयोभवतीति

ज्ञातव्यं॥ एवं सर्वत्र धनं चतुर्गुणोत्तरक्रमेण गच्छति। कृणमपि अष्टकृति सुखं। उपरि उपरि
द्विगुणोत्तरक्रमः च स्यात्। अथैवमादि १७६। ६४ उत्तर ४ गच्छ। [छे २ छे छे १ / ७१ / २] मानीय तत्संकलितधन
मानयन् सर्वज्योतिर्बिंबानयनप्रकारमाह॥ आणियगुणसंकलिदं किंचूणं पंचठाण
संठविदं। चंदादिगुणंमिलिदे जोइसबिंबाणि सव्वाणि॥ ३५८॥ पदमेत्ते गुणयारे इत्यादिना पद
गतोपरितनराशि [छे २ छे छे १] मात्र गुणकारप्रमाण द्विके। २। २॥ अन्योन्यं गुणिते सति त
मेत्त द्विगेगुणे राशी [७१ / २] इति न्यायेन अंशेणीर्भवति। तन्मात्र गुणकारपरद्विके गुणिते अपरांश्रे
णिर्भवति। पदगता धस्तनराशि [१ / २] गते कलत्त योजनछेद १७ मात्र द्विकद्वये परस्परं गुणि
ते लक्षवर्गो भवति १ल। १ल तद्गतं गुल ७६८००० छेद १९ मात्र द्विकद्वये अन्योन्यं गुणि
ते प्रतरांगुल ८ लो भवति ४। तद्गत षट्रूपद्विकद्वये अन्योन्यं गुणिते चतुःषष्टिवर्गो भवति ६४॥ ६४॥
तद्गत त्रिकमात्र द्विकद्वये अन्योन्यं गुणिते सप्तवर्गो भवेत्। ७।७॥ पदमात्र गुणकारहतरा
शावेकस्मिन्रूपे अपनीते रूपन्यून गुणकारेण ३ हृते मुखेन १७६। ६४ गुणिते च संकलितध
नं भवतीति।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १२ १७६। ६४॥ / ४। ७६८००० | ७६८००० | १ल १ल | ६४ | ६४ | ७ | ७ | ३ | |

एवमेव क्रमेण संकलितधनमप्यानेतव्यं॥

संकलितधनराशिस्योपरितन षट्सप्ततिशतं १७६ अधस्तन
चतुःषष्ट्या ६४॥ सह नावर्तेन वा ६४ पवर्तयेत्। अंगुल षट्कृत्यानि।

{ १ ६४ / २ । ७६८०००। १ल। ७। ६४। १ }

लक्षगतदशशून्यैः सहषोडशशून्यानि पृथक्कृत्वा स्थापयेत्। अंगुलांकवर्गं त्रिभिः संभेद्य छेदे
सदृशरूपणावर्गमन्योन्यंगुणिते १ण ही स्यात् अधस्तनत्रिकत्रयमन्योन्यंगुणयित्वा २७ ते
न सप्तवर्गं ४९ संगुण्य १३२३ अवशिष्टचतुष्केण गुणयित्वा तस्मिन् तानि शून्यानि मेल
येत

| |
|---|
| ५ ११ |
| ४।६५ ।५२९२००००००००००००००००० |

भ्य

एवमानीते गुणसंकलितेन जंबूद्वीपादार
दो दो वग्गमित्याद्युक्तं चन्द्राधिकं सर्वं।२।४।।
१२।। ४२।७२।। मेलयित्वा १३२ तस्मिन् पुनः पुष्करोत्तरार्द्धगतचंद्राणां संकलितधनं प
दमेगेणविहीणं।७।। दुभाजिदं। ७/२। उत्तरेण संगुणिदं। ७/२।४ अपवर्त्य १४ एवं १४४।।
जुदं १५८ पदहदगुणिदं १२६४ इत्यानीय मेलयित्वा १३९६ इदं ऋणसंकलितधनेन समछे
दं कृत्वा

| |
|---|
| १३९६। सू२।७६८०००।१ल।६४।७।१। |
| सू२। ७६८०००।१ल।६४।७।१ |

स्य ऋणं

एतत्सर्वं संख्यातं सूच्यंगुलं कृत्वा सू२१ ऋण
राशेर्द्धनं भवतीति न्यायेन ऋणसंकलितध
नक्षेपेणापनीय
ऋणसहितधन
लव्यतिरिक्तगुण

| |
|---|
| ६५ १ |
| —६४ |
| सू२।७६८०००१ल।७।६४।१ |

एवंभूतऋणसंकलितधनेकक्षेपेण सह
संकलितं समानछेदं कृत्वा। तस्य सूच्यंगु
कारं सर्वं संख्यातं कृत्वा ७ तत्संख्यातसूच्यं

| |
|---|
| —सू।२।६४।७६८०००१।ल।७।६४।३। |
| ४।७६८०००।७६८०००।१ल१ल।७।७। ६४।६४।३। |

गुलगुणकारक्षेपेण —सू२१सं
कलितधनेकक्षेपेण साम्यं प्रद- ६२

र्धं तत्रैवापरस्यांशेणापनीते किंचिन्न्यूनं भवति | =०-२१११। / ४।६५=५२८।२१९६। | एतनसंचतुस्था
नेषु संस्थाप्य चंद्रादिप्रमाणेन गुणयित्वा

| =०-२१११।२। / ४।६५=५२८।२१९६ | =०२१११।१। / ४।६५=५२८।२१९६ | =०-२१।।११।८८। / ४।६५=५२८।२१९६। | =०२१११।२८। / ४।६५=५२८।२१९६। |

| =०-२१११।६६८७५।१५४। / ४।६५=५२८।२१९६ | संमिलिते अत्रस्थान | =७३६७२५००००००००००००१२८८ / ४।६५=५२८।२०००००००००००००००० | सदृशाप

वर्त्तनन्यायेन विंशतिस्थानान्यपवर्त्यंते इदं मनसिकृत्यैव सदृक्ष्प्रणांगुलकृदिहिपदपदरस्सरत्याघुक्तं एन देवअसंख्यातद्वीपसमुद्रगतसर्वज्योतिर्बिंबप्रमाणं स्यात्। अथैकचन्द्रस्य परिवारणां ग्रहनक्षत्रतारकाणां प्रमाणं निवेदयति। ॥ अडसीदिहावीसागहरिक्खातारकोडकोडीणं। छावट्ठिसहस्साणि य णवसयपणत्तरि गिचंदे।३५८॥ अष्टाशीत्यष्टाविंशति।८८।२८॥ ग्रहनक्षत्रयोः तारकाणां प्रमाणं षट्षष्टिसहस्राणि नवशतपंचसप्ततिकोटीकोट्यः एकस्मिन् चंद्रे परिवारः। अथ ह्यष्टाशीतिग्रहाणां नामान्यष्टभिर्गाथाभिर्निरूपयति॥ ॥ कालविकालो लोहिद णाम सो कणयक्खकणय संठाणं दोनो कवयवदुंदुभिरत्तणिहरूवणिभासा।३६०॥ कालविकालो लोहितनामा कनकाख्यः कनकसंस्थानः। अन्तरदस्ततः कवयवः दुंदुभिः रत्ननिभः रूपनिर्भासः ८॥ ॥ णीलो णीलब्भासो अस्सस्सहाण-

त्रि·सा· कोसकंसादी। वणाकंसो सकत्तादिमपरिमाणो य संखवणोवि।३६१॥ नीलो नीलाभा
६३ सोऽञ्जोत्थवस्थानेः कोशः कंशवर्णः कंसः शंखपरिमाणः शंखवर्णोपि।८९॥ तो उदय
पंचवणा तिलोय तिलपुच्छ खाररासी य।तो धूमधूमकेदि गिसंणाएणाकलेवरो विय
डो।३६२॥ ततउदयः पंचवर्णस्तिल श्च तिलपुच्छः क्षारराशिः। ततो धूमो केतुः। एकसं
स्थानः अक्षः कलेवरो विकटः।११।छ॥ इहभिणसंधि गंठी माणवसु पाय विज्जजिन्न
णाभा। तो सरिसणिलय कालय कालादी के य अण्णय क्खा॥३६३॥ इहाभिन्नसंधि
ग्रंथिर्मानश्चतुः पादो विद्युज्जिह्वो नभः। ततः सदृशो। निलयः कालश्च कालकेतुर
नयाख्यः।११ सिंहाउ विउल कालामह कालो रुद्द एगमम रुरुहा संताणसंभय क्खा
सव्वहिदि सा य संति वत्थूणो।३६४॥ सिंहायुर्विपुलः कालो महाकालो रुद्रनामा
महारुद्रः सन्तानः संभवाख्यः सर्वार्थादिशः शान्तिर्वस्तूनः १२॥ छ। णिच्चलपलंभ-
णिम्मंतज्जोदिमं तासयं पहो होदि। भासुरविरजा तत्तो णिद्दुक्खो वीदसोगो य॥३६५॥
निश्चलः प्रलंभो निर्मन्त्रो ज्योतिष्मान् स्वयंप्रभो भवति। भासुरो विरजस्ततो निर्दुःखो
वीतशोकश्च।१३। छ। सीमंकर खेमभयंकर विजयादि चउ विमल तत्थाय। विजयण्ह ६३
वीयसो करिकट्ठि गिजडि अग्गिजाल केदू।३६६॥ सीमंकरः क्षेमंकरः अभयंकरः विज
यो वैजयन्तो अपराजित इति चत्वारः। विमलस्त्रस्तश्च विजयिष्णुर्विकसः करिकाष्ठः।

सकजरिरश्मिन्निज्वालोज्वलकेतुः॥१५॥ छ॥ केदूखीरसघस्सवणाएहूमहगहाय
भावगहो। कुजसणिवुहसुक्कगुरूगहाणणामाणि अउसीदी॥ ३६७॥ केतुः क्षीरसः अ
घः स्रवणो राहुः महाग्रहश्च भावग्रहः कुजः शनिर्बुधः शुक्रः गुरुरिति ग्रहाणां नामान्य
ष्टाशीतिः ८८॥ अथ जम्बूद्वीपस्य भरतादिक्षेत्रपर्वतानां ताराणां बाहुल्यं विभजय
ति। छ॥ णउदिसयभजिदताराएसगदुगुणसलसमभत्थाभरहादिविदेहोत्तियताए
वस्सेयवस्सधरे॥ ३६८॥ नवत्युत्तरशतशलाकानां १९० चंद्रद्वयताराश्चेत॥ १३३९५॥
भरतादिक्षेत्रप्रमाणरूपैकसलाकादीनां। १।२।४।८।१६।३२।६४॥ ३२।१६।८।४।२।१।
कियंतस्ताराः स्युरिति त्रैराशिकविधिनानवतिशतभक्ततारः॥ ७०५॥ १५॥ स्वकीयस्वकी
यद्विगुणशलाकासमभ्यस्ताभरतादिविदेहपर्यंतं वर्षे क्षेत्रे वर्षधरपर्वते च ताराभवं-
ति। अथ लब्धांकमुच्चारयति। छ॥ पंचुत्तरसत्तसयाकोडाकोडीयभरहताराओ। दुगु
णा हु विदेहोत्तियते णपरं दलिददलिदकमा॥ ३६९॥ पंचोत्तरसप्तशतकोट्यः॥ ७०५
भरततारः स्युः द्विगुणद्विगुणाः खलु विदेहपर्यंतं। हिमवतिपर्वते। १४१०।१५। हैमवत
क्षेत्रे २८२०।१५। महाहिमवतिपर्वते ५६४०।१५॥ हरिक्षेत्रे ११२८०।१५। निषधपर्वते २२५६
१५। विदेहक्षेत्रे ४५१२०।१५। ततः परं दलितदलितक्रमो ज्ञातव्यः नीलपर्वते। २२५६०।१५।
रम्यकक्षेत्रे ११२८०।१५। रुक्मिपर्वते ५६४०।१५। हैरण्यवतक्षेत्रे। २८२०।१५। शिखरिपर्व

ते १४१।१५। ऐरावतक्षेत्रे १०५।१४। अथ लवणादिपुष्करार्द्धांतस्थितचंद्रार्काणामंतर
माह। छ॥ सगरविदलबिंबूणा लवणादी सगदिवायरद्धहिदा। सूरंतरं तु जगदी आस
णपहंतरं तु तस्सदलं ॥ ३७०॥ स्वकीयस्वकीयरविघप्रमाणाई २ गुणितरविबिंब ४८/६१
प्रमाणेन ९६/६१ न्यूनसमानच्छेदीकृतलवणादिव्यासः २ ल ॥ १२१९९९९०४/६१
द्वयोरन्त रमोरेतावत्यंतरे १२१९९९९०४/६१ एक स्य कि
यदंतरमिति संपातन्नागतस्वकीय दिवाकरा ४ द्विरहृते च्छेत् ९९९९९।
९९ शेषे २६/१२२ द्वाभ्यामपवर्त्तिते १३/६१ लवणसमुद्रगतसूर्यसूर्यान्तरं जगत्याः आ
सन्नप- थांतरं तु नस्त- स्य दलप्रमाणं स्यात् ४९९९९९ विषमत्वाद्द
लनं कथमिति चेत् एकं रूपमपनीय ९९९९९८ दलिता ४९९९९९ अपनीतैकं र
लरूपेण संस्थाप्य १/२ प्राक्तनशेषमपि १३/६१ तद्रूपं शत्वा दलित्वा १३/६१२ अस्मिन्न
पनीतदलरूपं स मानच्छेदं कृत्वा- ६१/६१ २ मेलयित्वा- ७४/६१२ द्वा
भ्याम् अपवर्त्तिते ३७/६१ जगत्यासन्नपथान्तरस्य शेषो भवति। एवं धा
तकीषंडकालोद कसमुद्रपुष्करार्द्धस्थितसूर्यसूर्यान्तरं जगत्यासन्नपथांतरं चाने ६४
तव्यं। इदानीं चारक्षेत्रमाह। छ। दो दो चंदरविं पडि एक्केक्कं होदि चारक्षेत्तं तु ॥ पंचसयं
दससहियं रविबिंबहियं च चारमही। ३७१॥ द्वौ द्वौ चंद्ररवी प्रति एकैकं भवति चारक्षे

त्रं। समस्तचारक्षेत्रं पुनः कियदिति चेत्॥ पंचशतानि दशसहितानि। रविबिंबप्र
माणेनाधिकानि। ५१० ४८/६१ वारमहीप्रमाणं स्यात्। अथ तयोश्चारक्षेत्रविभागनि
यममाह। छ॥ जंबुरविं दूदीवे चरंति सीदिंसदं च अवसेसं। लवणे चरंति से-
सासगसगखेत्ते व्व चरंति॥ ३७२॥ जंबूद्वीपस्य रवींदवः अशीतिशतयोजनानि १८०
द्वीपे चरंति अवशिष्टयोजनानि ३३० ४८/६१ लवणसमुद्रे चरंति। शेषाः पुष्करार्द्धपर्यं
तचन्द्रादित्याः स्वकीयस्वकीयक्षेत्रे एव चरंति। अथ तत्र सूर्याचंद्रमसोर्वीथीप्रमा
णं कथयति। छ॥ पडिदिवसमेक्कवीथिं चंदाइच्चा चरंति हु कमेण। चंदस्स य पणरस
इणस्स चउसीदिसयवीथी॥ ३७३॥ द्वौ द्वौ मिलित्वा प्रतिदिवसमेकवीथीं चंद्रादित्याश्च
रन्ति खलु क्रमेण चन्द्रस्य पंचदशवीथ्यः इनस्य चतुरशीतिशतवीथ्यः स्युः॥ अथ वी
थीनामन्तरेण दिवसगतिं कथयति। छ॥ पथवासपिंडहीणे चारक्खेत्ते णिरेयपथ
भजिदे वीथीणं विच्चालं सगबिंबजुदो दु दिवसगदी॥ ३७४॥ पथव्यासेन ४८/६१ गुणिता
वीथ्यः १८४ पथव्यासपिंडः ८८३२/६१ समानच्छेदीकृते दशोत्तरपंचशते ३१११०/६१
आदित्यबिंबे ४८/६१ मिलिते सति ३११५८/६१ चारक्षेत्रं स्यात्। अस्मिन् पथव्या
सपिंडे ८८३२/६१ अपनीते सति एवं २२३२६/६१ अत्र त्यभागहारं ६१। निरेकपथेन १८३
गुणयि- ६१ त्वा १११६३। अनेन भागहारे ६१ ण अपनीतव्यासपिंडे २२३२६/१११६३ भक्ते सति

रवीथीनांविचालंअन्तरालंस्यात।एतत् स्वकीयबिंब ४८/६१ युक्तंचेत १७० ४८/६१ प्रतिदिवसं
गमनक्षेत्रप्रमाणंस्यात्।एवमेवचंद्रसञ्चारक्षेत्रं। — ३११५८/६१ पथव्यास
पिंडं ८४० ४/६१ ऐरारभ्यप्रतिमार्गमंतरंतत्परिधिंचाह॥ सुरगिरिचंदरवीणंम
गंपडिअन्तरंचपरिहिंच। दिणगदिंतप्परिहीणंखेवादोसाहए कमसो॥३७५॥
सुरगिरिचंद्ररवीनांमार्गंप्रत्यंतरंचपरिधिश्चानेतव्यो कथमितिचेत्।जंबूद्वीपव्यासे
एकस्मिन्लक्षे१लतद्वीपाभ्यंतरेऽभयपार्श्वस्यचारक्षेत्रप्रमाणं३६०मपनीयतेचेत्।
अभ्यन्तरवीथीविष्कंभः९९६४०स्यात्।तदेवसूर्यसूर्यान्तरंस्यात्तत्रमेरुव्यास
१००००मपनीय८९६४०अर्द्धीकृते४४८२०।सुरगिर्यभ्यन्तरवीथीस्थसूर्यांतरंस्यात्।
तत्रदिवसगति२ ४८/६१ क्षेपेकृतेसति४४८२२ ४८/६१ द्वितीयवीथीगतसूर्यसुरगिर्यो रं
तरंस्यात्एवंप्राचीनसुरगिरिसूर्यान्तरे दिनगतिक्षेपेकृतेउत्तरोत्तरसुर
गिरिसूर्यांतरंस्यात्।अभ्यन्तरवीथीविष्कंभे९९६४०द्विगुणदिनगतिं ३ ४०/६१ भ
क्त्वा५ ३५/६१ क्षेपेकृते९९६४५ ३५/६१ द्वितीयवीथीगतसूर्यसूर्ययोरंतरंस्यात्॥
एवस्वस्याभ्यंतरेविष्कंभेद्विगुणदिनगतिक्षेपं॥५ ३५/६१ कृत्वाउत्तरोत्तर ६५
सूर्यसूर्ययोरन्तरंज्ञातव्यं।विष्कंभेस्यादिनाभ्यंतरविष्कंभस्य परिधिमानीयत
स्मिन्अभ्यन्तरवीथीपरिधौ३१५०८९द्विगुणदिनगति।३ ४०/६१ परिधिंविष्कंभ ३ ४०/६१

वग्गदहगुणा ११५६००१/६१।६१ करणी २०७५/६१ त्यादिना नीयनिजहारेणभक्ता १७। ३८/६१ नि
क्षिप्ते ३१५१०६। ३८/६२ हिनी यवी थीपरिधिः स्यात्अमुमेवद्विगुणं
दिनगतिपरिधिं पूर्वपूर्व परिधौ क्षेपे कनेउत्तरएत्तरवी थी परिधिः स्यात्एवमु
क्तप्रकारेणदिनगतिक्षेपात्। द्विगुणदिनगतिक्षेपात्द्विगुणदिनगतिपरिधिक्षेपाच्चसु
रगिरिसूर्यान्तरं सूर्यसूर्यान्तरं परिधिंचसाधयेत्क्रमशः अथैवमुक्तपरिधौपरिभ्रमतः
सूर्यस्यदिनरात्रिहेतुत्वंतयोः प्रमाणंच मार्गाश्रयेणाह। छ। सूर देदिणरत्ती अट्ठार
सबारसामुहुत्ताणं। अब्भंतरंमिएवंविवरीयंबाहिरंमिहवे॥३७६॥ सूर्यान्मुहूर्तीना
मष्टादशद्वादशासंख्येद्वयथासंख्यंदिनरात्रीस्यातां क्वेति चेदभ्यंतरपरिधौ एतदेवविं
परीतंबाह्यपरिधौ भवेत्॥ अथसूर्यस्यावस्थितिस्वरूपंदिनरात्र्योर्हानिचयंचाह। छ॥
कक्कडमयरेसव्वब्भंतरवाहिरपहट्ठिओहोदि। मुहभूमीणविसेसे वीथीणंतरहिदेप
चयं॥३७७॥ कर्क्कटकेमकरेचयथासंख्यंसर्वाभ्यंतरपथस्थितोबाह्यपथस्थितश्चभ
वतिसूर्यः। अथनद्वादशसमासिपर्यन्तंकिंतावत्येव १८।१२॥ तिष्ठतीतिआशंक्यप्रतिदिनंहा
निचयोस्तीत्याह। मुख १८ भूमि १२ विशेषे ६ अशीतित्र्यात १८३ वीथ्यंतराणां दिनरूपा
णांषण्मुहूर्त्तायदिएकवीथ्यंतरस्यकियन्मुहूर्ता इति संपतिनागतेन वीथीनामन्तरेण १
८३ हृते ६/१८३ भागाभावात्त्रिभिरपवर्त्तिनेच २/६१ प्रतिदिनंहानिचयो भवति। अथैवमुक्तदि

नराश्रोस्तापतमसोवर्त्तमानकालत्वात्तत्तापक्षेत्रप्रमाणंनिरूपयन्। श्रावणमाघमा
साभ्यांदक्षिणोत्तरायनंनिरूपयति॥ ऋ॥ सावणमाघेसद्वक्षंतरबाहिरंपहद्विश्रोहेदि।
सूरहियमाससयतावतमासच्चपरही॥ सु। ३७८॥ श्रावणमासेमाघमासेयथासंख्यंसर्वा
भ्यंतरपथबाह्यपथस्थितोभवतिसूर्यः तस्यसूर्यस्थितमासस्यतापतमसीसर्वपरि
धिष्वानेतव्येषणमासानामेतावत्सुदिनेषु। १७९। श्रावणाद्येकादिमासानांकिमितिसंपात्सा
पवर्त्तितेतत्तन्मासानांदिनसंख्याः स्युः श्रा। ६१/२। भा। ६१ श्रा। १८३/२। का। १२२ मा। ३०५/२ पु१
८३मा। ६१/२ फा। ६१ चै। १८३/२ वै। १२२ ज्ये। ३०५/२ श्रा। १८३ इमा ग्येवदक्षिणा/२ यनो
त्तराय/२ णदिनानि स्युः। अथस/२ र्वपरिधिषुतापतमसोरानयनप्रकारमाह॥ ऋ।
गिरिश्रद्धंतरमज्झिमबाहिरजलछट्ठभागपरिहिंतु। सट्ठिहिदेसरहियमुहुत्तगुणिदेदु
तावतमा। ३८०॥ गिरिविष्कंभः। १००००। एतावानेवजंबूद्वीपप्रमाणे। १००००० द्वीपचारक्षे
त्रं१८० द्विगुणीकृत्य ३६०। अपनीतेअभ्यंतरवीथीविष्कंभः ९९६४० चारक्षेत्र ५१० मर्द्धी
कृत्य २५५ अस्मिन्द्वीपचारक्षेत्र१८० मपनीय। ७५ इदमुभयपार्श्वार्थंद्विगुणीकृत्य
१५० जंबूद्वीपेरलनिक्षिप्ते १००१५० मध्यमवीथीविष्कंभः लवणसमुद्रचारक्षेत्र३३०
मुभयपार्श्वार्थंद्विगुणीकृत्य ६६० जंबूद्वीपेरलमिलिते१००६६० बाह्यवीथीविष्कम्भः। ९९
लवणसमुद्रप्रमाणं२लक्षंषष्ठिसक्तेदं ३३३३३। २/६। पार्श्वद्वयार्थंद्विगुणीकृत्य ६६६६६। ४/६।

त्रोषमपवर्त्य [२/३] इदं जंबूद्वीपे निक्षिप्ते १६६६६६ [२/३] जलषष्ठभागविष्कंभः स्यात्। एता
न् पंचविष्कं भान् धृत्वा विक्कंभवर्गेत्यादि नागिरिपरिधिं ३१६२२ अभ्यंतरपरि
धिं ३१५०८९। मध्यमपरिधिं ३१६७०२ बाह्यपरिधिं ३१८३१४। जलषष्ठभागपरिधिं च विस अस्याग्रे त्रुटि पत्र ६८ में देखो
दृशान् परिधीन् कथं समानकालेन समापयतीत्यत्राह।। णायंतासिग्घगदीपवि
संतारविससीदुमंदगदी।। विसमाणि परिरयाणि दु साहंत्ति समाणकालेण।३८३।।
निर्यांतौ शीघ्रगती भूत्वा प्रविशंतौ रविशशिनौ मंदगती भूत्वा विषमान् परिधीन् साधयतः
समापयतः समानकालेन। अथ तयोः रविशशिनोर्गमनप्रकारं दृष्टांतमुखेनाह
गयहयकेसरिगमणं पढमे मज्झे तिमे य सूरस्स। पडिपरिहिं रविससिणो मुहुत्तगदिखे
त्तमाणिज्जो।।३८४।। गजगमनं हयगमनं केसरिगमनं प्रथमे मध्यमे अंतिमे च पथि
सूर्याचन्द्रमसोर्भवति। इदानीं रविशशिनोः प्रतिपरिधि मुहूर्तगतिक्षेत्रमानेयं। कथ-
मितिचेत्।। षष्टिमुहूर्तानां ६० मेतावति क्षेत्रे ३१५०८९ एकमुहूर्तस्य कियत्क्षेत्रमिति सं
पातेनानेतव्यं सूर्यस्याभ्यंतरपरिधौ मुहूर्तगतिरियं।। ५२५१ [२९/६०] चंद्रस्याप्येवं त्रैराशि
कविधिनानेतव्यं चंद्रस्य परिधिसमापनकालः। ६२ [२३/२२१] स- मच्छेदेनानयोर्मेल
नेप्रमाणराशिः [१३७२५/२२१] फल ३१५०८९ इच्छा मुहूर्त १ लब्ध ५०७३ शेष [७७४४/१३७२५]
अथाभ्यंतर रवी- थीस्थ सूर्यस्य चक्षुःस्पर्शाध्वानमानयति गाथात्रि

=२ अयं परिसमापनकालः। अट्ठविलत्तर सय इतिगा ८०० योजनाद्धषष्टि सत्तर शशत
गगनखंडानां गत्तो। १७६८ एकस्मिन्मुहूर्ते द्वयतां गगनखंडानां गत्तो १०९८०० किमंतर
तिसंपातेनसमागतः =२=

केन॥छ॥ सहिहिंहिं दपढमपरिहिं गावगुणिदे च क्खुपासअद्धाणं। तेणूणं णिसहावलचा
वद्दं जं च माभिणं॥३८५॥ षष्टिमुहूर्त्तानां एतावति गमनक्षेत्रे ३१५०८९ नव मुहूर्त्तानां कि
यत्क्षेत्रमिति संपात्य क्रमेण षष्टिभिर्हीने प्रथमपरिधौ ३१५०८९ त्रिभिरपवर्तितैः। ३
३१५०८९।३ २० गुणयित्वा ९४५२६७ २० भक्ते सति ४७२६३ शे ७/२० चक्षुःस्पर्शाध्वा भव-
तिनिषधा वलचाप २३७६८ १८/१९ इषु ६१८८४ शे ९/१९॥
तेन चक्षुःस्पर्शाध्वना न्यूनं यत्तत्प्रमाणमिदं खरेण गाथा - १९ यां कथ्यमानं॥ १९
छ॥ इगिवीसछदालसयं साहियमागम्म णिसहउवरिमिणा। दिस्सदि अउज्झमज्झे ते
णूणा णिसहपाससुजो॥३८५॥ एकविंशत्युत्तरषट्चत्वारिंशच्छतं साधिकं १४६२१
किं तत्साधिकं अध्वचापयोः शेषं ७/२० | ९/१९ परस्परहारेण धन्नोपरि गुणयित्वा॥
१३३/३८० | १८०/३८० शेषिते पर्याग ४७/३८० एवं अत्र २० | १९ नेन साधिकमित्युच्यते एतावन्निषधस्यो
स्पष्टो दृश्यते अयोध्यामध्ये उत्कृष्टपुरुषैः निषधपा-
र्श्वभुजः २०१९ एतेनागतक्षेत्रेण १४६२१ न्यूनः अग्रेवक्ष्यमाणं भवति॥छ॥ णिसहुवरिं गंतव्वं
पणसगवणासपंचदेसूणा॥ तेत्तियमेत्तं गंता णिसहे अत्थं च जादि रवी॥३८६॥ निषधोपरि गंतव्यं पंच ६७
सप्त पंचाशत्पंचदेशोना ५५७५ एतावन्मात्रमेव निषधस्योपरि गत्वा रविः अस्तं याति। इदानीं प्रकृत
चापानयनार्थं तद्बाणानयनप्रकारमाह॥छ॥ जंबूचारधरूणा हरिवस्ससरोयणिसहबाणो यारद

त्रुटिपत्रर्द्धं७॥ { धिंपूर्२९७०४६ चानीयस्तेनेषां गिरिपरिध्यादीनां मध्ये विवक्षितपरिधिं ३१६२२ मु
हूर्त्तषष्ट्या विभज्य ५२७॥ [१/३०] यस्मिन् मासे सूर्यस्तिष्ठति तन्मास दिन रात्रिमुहूर्त्तैः ।१८।१७।१६।
१५।१४।१३।१२॥ गुणिते ७८६ ज्ञेषे [१८/३०] षड्भिरपवर्त्तिते [३/५] चलब्धं । तस्मिन् मासे तापतमसो
र्विषयक्षेत्रमागच्छति । विवक्षितपरि धिं ३१६२२ मुहू र्त्तषष्ट्या ६० विभज्य मासंप्रतिमुहू
र्त्तवृध्या गुणिते ५२७ [१/३०] मासंप्रतिक्षेत्रहानिचयमागच्छति । मासंप्रत्येकमुहूर्त्तवृद्धिरिति कथं
एकस्मिन् दिने मुहू र्त्तस्यद्वैकषष्टिभागमात्रे [२/६१] हानिचये । एकषष्टिदिनदलस्य [६१/२]
किंपद्धानिचयमिति संपात्यापवर्त्तिते लब्धमुहूर्त्तए कः १ एवं धृत्वा षष्टिमुहूर्त्तानामे
तावति क्षेत्रे गते ।३१६२२ एकमुहूर्त्तस्य कियत्क्षेत्रमिति संपात्यापवर्त्तिते लब्धमिदं । ५२७।
[१/३०] मासंप्रतिक्षेत्रेगते ३१६२२ एकमुहूर्त्तस्य कियत्क्षेत्रमिति संपात्यापवर्त्तिते लब्धमिदं ॥
५२७ [१/३०] मासंप्रतिक्षेत्रहानिचयं स्यात् । इदं दक्षिणायने तन्मासतापक्षेत्रे अपनयेत् । त-
मःक्षेत्रे (३०) युंज्यात् । उत्तरायणेन तन्मासतापक्षेत्रे युंज्यात् । तमःक्षेत्रे अपनयेत् । एवं
कृते विवक्षितपरिधौ तापतमसोर्विषयक्षेत्रमागच्छति । छ ॥ अथैवमानीततापतमसोर्वर्त्त
नाक्षेत्रमाह । छ ॥ परिधिम्हि जम्हि चिट्ठदि सूरो तस्सेव ताव माणादलं ॥ विंबपुरदो पसप्पदि प
च्छाभागे य सेसद्धं ॥३८०॥ यस्मिन् परिधौ सूर्यस्तिष्ठति तस्यैव तापप्रमाणदलं विंबपुरतः प्रस
र्पति शेषार्द्धं पश्चाद्भागे अपसर्पति । इदानीं तापतमसोर्हानिवृद्धिमाह । छ ॥ पढमापरिधीयेभ

त्रुटिपत्रम्।

त्रि॰सा॰ जिदेदसागुणसूरंतरेणजत्तद्धं। साहोदिहाणिवड्ढीदिवसेदिवसेचतावत्तसे।३८१॥ षष्टिमुहूर्त्ता
६८ नांपंचपरिधान्यतरप्रमितेपुद्रेत्रेषुगतेषुद्वैकषष्टि $\frac{२}{६१}$ मुहूर्त्तानांकियत्क्षेत्रमितिसंपातेन
पंचपरिधिषुदशगुणसूर्यांतरेण१८३० भक्तेषुयल्लब्धं।१७ $\frac{५१२}{१८३०}$ साभवतिहानिवृद्धि
र्दिवसेदिवसेचतापतमसोः। अथपंचपरिधीनांसिद्धांकंगाथाद्वयेनकथयति।छ॥ बावी
ससोलतिणियउणणउदीपसमेक्कतीसंचदुखसत्तट्ठिगितीसंचोदसनेसीदिइगितीसं॥
३८२॥ द्वाविंशतिषोडशत्रीणि३१६२२गिरिपरिधिः। एकोननवतिपंचाशदेकत्रिंशदभ्यन्त
रपरिधिः।३१५०८९। द्विखसप्तषष्ठ्येकत्रिंशत्मध्यपरिधिः३१६७०२चतुर्दशत्र्यशीत्येकत्रिं
शद्बाह्यपरिधिः।३१८३१४॥छ॥ छादालसुणसंत्तयबावणंहोंतिमेरुपहुदीणं। पंचण्णपरि
धीकमेणअंकक्कमेणेव३८६ षट्चत्वारिंशच्छून्यसप्तद्विपंचाशज्जलषष्ठभापरिधिः५२
७०४६ इतिभवतिमेरुप्रभृतीनांपंचानांपरिधयः क्रमेणांकक्कमेणैव॥अ

इसकेआगेकापाठ
पत्र६७मेंदेखो

बाणावहंपुणअखंतरवीहिविल्थारो ॥ २८७ ॥ अंतधणं १६ गुण २ गुणियं ३२ आदिविहीणं
३१ रूउणुत्तरभजियं (३१/१) रति शलाकामानीय एतावच्छलाकानां १८० एतावति क्षेत्रे १००००
एतावद्धरिवर्षशलाकानां ३१ निषधशलाकानां च ६३ कियत्क्षेत्रमिति संपात्यगुणिते हरि
वर्षबाणः (३१००००/१९) निषधबाणः (६३००००/१९) एनौ हरिवर्षनिषधबाणौ समानच्छेदीकृते जंबू
(३४२०/१९) चारधरा १८० न्यू नौ चेत् रूचसुरध्वानयने बाणौ स्यातां तयोर्द्वि
(३०६५८०/१९) (६२६५८०/१९) गुणविष्कंभः पुनः जंबूद्वीपे स्थलद्वीपचारक्षेत्रं १८० द्विगुणी
कृत्य ३६० अ पनीते अभ्यन्तरवीथीविस्तारः स्यात् ९९६४० अमुं वि
विष्कंभं समच्छेदीकृत्य (१८९३१६०/१९) अत्रेसु (३०६५८०/१९) हीणं विक्खंभं (१५८६५८०/१९) च
उगुणिदिसुणा (१२२६३२०/१९) हदे दु जीव कदी ~~६५४५७८५~~ (१९४५/३)
(६५४५७८५६००/३६१) बाणकदिं (९३९९१२९६४००/३६१) छहिगुणि दे
(५६३९४७७७८४००/३६१) तस्य (३६१) जुदे धणुकदि होदी (२५०९९६०२५६४०००/३६१) ह
तन्मूलं (१५८४१७२/१९) स्वहारेण भक्तं चेत् (८३३७७ ९/१९) शेषं
रिवर्षचापं स्यात् निषधस्य तावत् समच्छेदीकृते तस्मिन् ९९६४०
न्नेव विष्कंभे (१८९३१६०/१९) इसु (६२६५८०/१९) हीणं विक्खंभं (१२६६५८०/१९) चउगुणिदि
सुणा हदे दु जी (१९) वकदी (१९) (२५०६३२०/१९) (३१ ७४४५४७८५६००/३६१)

त्रि·सा·
६९८

बाणकरि। ३९२६०२४८९६४०० छ हिगुणिदे २२५५६१४८९१८४०० तत्थजुदे धणुकरी होदि ५५३००६८९१ / ३६१ ६४००० तन्मूलं २२५१ / ३६१ ६१० एतस्मिन्व्यवहारेण १९। भक्ते। ३६१ / १२३७६८॥ शेष १८ निखि १९ धगिरिचापंस्यात्॥

अथैवमानीतयोश्चापयोः किं कर्त्तव्यमित्यत्राह। १९ ।छ। हरिगिरिधणुसेसद्धंपासभुंजो सत्तसगत्तितेसीदीहरिवस्सेणिसढधणुअउरूस्सगतीसबारंच॥३८८॥ हरिक्षेत्रधनुः — ८३३६७ ९/१९ निषधगिरिधनुषि १२३७६८ १८/१९ शोधिते ४०३९१ शे ९/१९ सतितद्द्वाशावेकमप १९ नीयार्द्धीकृत्य २०१९५ शेषंचार्द्धीकृत्य ९/१९।२ अस्मिन्नपनीतार्द्धे १/२ समच्छेदीकृत्य १९/१९।२ अन्योन्यं संयोज्य २८/३८ तदप्यपवर्त्य १४/१९ इदं किंचिन्न्यूनंत्र गणयित्वाएकयोजनं कृत्वा हरिगिरिधनुश्शेषार्द्धे २०१९५ संयोजिते २०१९६ सतिनिषधस्य पार्श्वभुजो भवति। इदानींहरिगिरिधनुषोः सिद्धांकमुच्चारयति। सप्तसप्तत्रिव्यशीतियोजनानि। ८३३६७ हरिवर्षक्षेत्रेधनुः निषधपर्वतेधनुः अष्टषट्सप्तत्रिंशद्द्विशतचयोजनानि॥१२३७६८॥ अथोक्तयोर्धनुषोः शेषांकंपार्श्वभुजांकंचोच्चारयति। ।छ। माहवचंदुद्धरियाएवयकलाणायपदप्पमाणगुणा। पासभुजोचोद्दसकदिवीससहस्संचदेक्कणा॥३८९॥ माधवचंद्रेणो १९ द्धृता नवकला ९/१९ एताः हरिक्षेत्रस्यचापशेषाः एताएव ९/१९ नयस्थानप्रमाणरगुणिताः १८/१९ निषधचापसांशाः निषधस्यपार्श्वभुजः पुनः चतु ६९८

६शाकृतिविंशतिसहस्रयोजनानि २०१८६ देशोनानि ॥छ॥ अथायनविभागमकृत्वा सामान्येन
चारक्षेत्रे उदयप्रमाणप्रतिपादनार्थमिदमाह ॥छ॥ दिणगदिमाणं उदयो तेसिसहेसिलगे
यनेसट्ठी ॥ हरिरम्मगे सु दो दोस्ते रणवदससयं लवणे ॥३८०॥ दिनगतिक्षेत्रमिदं ॥ १७०/६१ ए
तावति क्षेत्रे यद्येकः सूर्यस्योदयो भवेत् तदा एतावति ५१० ॥ क्षेत्रे कियंत उदया इति सं पा
त्यभक्ते लब्धोदयाः १८३ पर्यन्ते शेषरविबिंबावष्टब्धे क्षेत्रे ४८/६१ एक उदयः मिलित्वा चारक्षेत्रे च
तुरशीत्युत्तरशतमुदयाः कुतः प्रतिवीथ्येकैकोदयसंभवात् तानेदिनगसुदयानिषधे द्वनी
लेच ६३ प्रत्येकं त्रिषष्टिः हरिरम्यकवर्षयोर्द्वौ द्वौ । लवणसमुद्रे एकान्नविंशंशतं ११९ ॥
अथ दक्षिणायने चारक्षेत्रे द्वीपवेदिकोदधिविभागेनोदयप्रमाणप्ररूपणार्थं त्रैराशिकोत्प
त्तिमाह ॥छ॥ दीउवहिचारखित्ते वेदीए दिणगदीहि दे उदया । दीवे चउ चंदस्स य लवण
समुद्दम्मि दस उदया ॥३८१॥ एतावति दिनगति क्षेत्रे ॥ १७०/६१ यद्येक उदयो लभ्यते तदा एतावति वे
दिका ४ रहित द्वीपचारक्षेत्रे १७६ ॥ कियंत उदया इति संपात्य भक्ते लब्धोदयाः ६२ एषु प्रथम
पथोदयस्य प्राक्तनायनसंबन्धित्वेनाग्रहणात् द्वाषष्टिरेवोदयाः ६२ शेष २६/१७० अत्र त्रिषष्टिर्दिनग
तिशलाका द्वीपचरमांतरपर्यंते समाप्ताः अवशिष्टा उदयांशाः षड्विंशतिः श प्रति शतभागा २६/१७०
एकस्योदयस्य । यद्येतावत्क्षेत्र १७०/६१ मागच्छति तदा एतावदुदयांशानां २६/१७० । कियत्क्षेत्रमि
त्यनेन त्रैराशिकेन फलेच्छयोर्गुणाकारसंजातक्षेत्रयोजनांशाः षड्विंश तिरेकषष्टिभागाः ।

।२६। एतेद्वीपसंबंधिनः। पौरस्त्यपथगतवेदिकायां पुनरेतावति क्षेत्रे १७०/६१ यद्येकउदयो भवे
।६१। तदा एतावति ४ वेदिकाक्षेत्रे कियंत उदयाः स्युरिति संपात्य हारस्य हारेण १७०/६१ एकष-
ष्ट्या गुणयित्वा ।२४४। अस्मिन्सप्ततिशतेन १७० हारेण भक्ते लब्ध उदयः। एकः १ शेषोदयां
।१७०।
शाः चतुःसप्ततिः सप्ततिशतभागाः एतेषु भागेषु ७४/१७० पूर्वोक्तन्यायेन क्षेत्रीकृतेषु चतुःस
प्ततिरेकषष्टिभागा ७४/६१ योजनस्य एतेषु द्वाविंशतिमेकषष्टिभागान् २२/६१ गृहीत्वा-
द्वीपचरमपथांशेषु- ६१ भागानीतेषु २६/६१ मेलयेत्। मिलिते सर्षुतमपथ्या सः अष्टच
त्वारिंशदेकषष्टिभागप्रमाणः संपूर्णो भवति। ४८/६१ ॥ एवं कृते अभ्यन्तरपथादारभ्य च-
तुःषष्टितमपथव्यासः द्वीपगतैः षड्विंशत्या एकषष्टिभागैः ।२६/६१ वेदिकागतै द्वाविंशत्या ए
कषष्टिभागैश्च २२/६१ सिद्धो भवति द्वीपवेदिकासंधौ सूर्यस्य चतुःषष्टितमी वीथी भ
वतीति। तात्पर्यं वे दितव्यं। छ॥ अतः पुरस्तात् वेदिकाया योजनद्वय २ मंतरमतिक्र
म्य सूर्यस्य एकः पंथा। ४८/६१ ततः पुरस्तात् द्वापंचाशदेकषष्टिभागाः ५२/६१ अवशिष्टा अन्तरे
देयाः। एवं द्वीपवेदिकासंधिपथव्यासगत द्वाविंशत्येकषष्टिभागेभ्यः २२/६१ आरभ्य चतुर्यो
जनप्रमाणं वेदिकाक्षेत्रं समाप्तं॥ छ॥ श्री॥ अथ लवणसमुद्रे एतावति क्षेत्रे १७०/६१ यद्ये
क उदयस्तदा बाह्यपथवर्जितसमुद्रचारक्षेत्रे ३३० एतावति कियंत उदया इति संपात्याप ७०
वर्त्तिते लब्धो रस्या अष्टादशशतं ११८ शेषोदयांशाः सप्ततिः सप्ततिशतभागाः ७०/१७० एतेषु पूर्व

वत्क्षेत्रीकृतेषु योजनांशाः सप्ततिरेकषष्टिभागाः (७०/६१) एतान्वेदिकासंवंधिपूर्वांतरगतेषु
द्विपंचाशदेकषष्टिभागेषु (५२/६१) प्रक्षेप्य एकषष्ट्या विभक्ते लब्धं योजनद्वयं संपूर्णमंतरप्रमाणं
स्यात् अतः परं रविबिंब सहितांतरप्रमाणं दिनगतिशलाकाः चरमांतरपर्यंताः अष्ट
दशोत्तरशतप्रमिताः ।११८। सुगमाः तत्रोदयाश्च तावंत एव ११८ ततः पुरस्तात् बाह्यपश्चा
से एक उदयः इति सर्वे मिलित्वा लवणसमुद्रे एकान्नविंशं शतमुदयाः ११९ एवं दक्षि
णायने समस्तोदयोः त्र्यशीत्युत्तरं शतं १८३ ॥ अथोत्तरायणे लवणसमुद्रे रविबिंबाधिक
चारक्षेत्रमिदं ३३० (४८/६१) समच्छेदीकृत्य युक्ते एवं ॥ (२०१७८/६१) एतावत्क्षेत्रस्य (१७०/६१) यद्येका
दिनगतिशलाका तदा एतावत्क्षेत्रस्य (२०१७८/६१) कियंत्यो दिनगतिशलाकाः
इति संपात्य भक्ते ।११८। शेष ११८/१७० अत्र रूपोन दिनगतिशलाकामात्रोदयाः ११७ कु
तः बाह्यपथोदयस्य दक्षिणायनसंबंधित्वेनाग्रहणात् । शेषांशेषु (११८/१७०)
क्षेत्रीकृतेषु ।११८। अष्टचत्वारिंशदेकषष्टिभागान् (४८/६१) पौरस्त्यपश्चाद्भासे दत्त्वा त
त्र एके उदयः एवं समस्तलवणसमुद्रे उत्तरायणे उदयाः अष्टादशोत्तरं शतं अवशि
ष्टाः सप्ततिरेकषष्टिभागाः (७०/६१) पौरस्त्ये अंतरे देयाः इति समुद्रचारक्षेत्रे समासमा । वेदिका
यां प्रागानीत एव एक उदयः चतुःसप्ततिरेकषष्टिभागाः (७४/६२) एतेषु भागेषु द्वापंचाशदेक
षष्टिभागाः (५२/६१) प्रक्षिप्तान्तरे देयाः एवं समुद्रवेदिकांशैर्योजनद्वयप्रमितमंतरं संप

णि भवंति। इंदा रंदिवा रसा होंति कप्पा हु॥४४८॥ मध्यमचतुर्युगलानां पूर्वयुग्मयोर्ब्रह्मलांतवयोरे
कैकेंद्रौ अपरयुग्मयोः महाशुक्रसहस्रारयोरेकैकेंद्रौ इतोशेष्वष्टसुकल्पेषु सर्वत्रेंद्रा भवंति। इतींद्रापेक्ष
या कल्पा द्वादश भवंति। अथ कल्पातीतविमाननामान्याह। ॥ हिट्ठिममज्झिमउवरिमतित्तियगेवेज्ज
गाव अणुद्दिसगा पंचाणुत्तरगा वियकप्पादीदा हु अहमिंदा॥४४९॥ अधस्तनमध्यमोपरिमत्रित्रिका
णि ग्रैवेयकाणि नवानुदिशानि। पंचानुत्तराणि च कल्पातीतविमानानि तेषु स्थिताः अहमिंद्रा भवं
ति। नवानुदिशविमानानां पंचानुत्तरविमानानां च नामानि गाथाद्वयेनाह॥ ॥ अच्चीय अच्चिमालि
णी वइरो वइरोयणी अणुद्दिसगा सोमे य सोमरूवे अंके फलिके य आइच्चे।४५०॥ अर्चिरर्चिमालिनी वै
रोचनाख्यानि चत्वारि श्रेणीबद्धानि दिग्गतानि। सोमसोमरूपांकस्फटिकाख्यानि चत्वारि विदिग
तानि प्रकीर्णकानि आदित्यं मध्ये इंद्रकं एतानि नवानुदिशाख्यानि। ॥ विजयो दु वैजयंतो जयंत अ
वराजिदो य णामा सव्वट्ठसिद्धिणामा मज्झम्मि अणुत्तरा पंच।४५१॥ विजयो वैजयंतो जयंतोऽपरा
जितश्च पूर्वादिदिग्गतविमानाख्याः मध्ये सर्वार्थसिद्धिनामेंद्रकं एते पंचानुत्तरविमानाः। ॥ अ-
थोर्ध्वकल्पकल्पातीतविमानानामवस्थानमाह। ॥ मेरुतलादु दिवड्ढं दिवड्ढ दलछक्क एक्क रज्जुम्हि।
कप्पाणमट्ठजुगला गेवेज्जादी य होंति कमे।४५२॥ मेरुतलात् द्वितीयार्द्धरज्जौ द्वितीयार्द्धरज्जौ। द ७१
लषट्करज्जौ च कल्पानामष्टयुगलानि क्रमेण भवंति। एकस्यां रज्जौ नवग्रैवेयकादीनि। क्रमेण भवंति
सांप्रतं सौधर्मादिषु विमानसंख्यां गाथात्रयेण कथयति। ॥ बत्तीसट्ठावीसं बारस अट्ठेव होंति लक्खा

णि। सोहम्मादि चउक्के लक्खचतु बम्ह इगे।।४५३।। द्वात्रिंशल्लक्षाष्टाविंशतिलक्षद्वादशलक्षाष्टलक्षा
णि यथासंख्यं सौधर्मादि चतुष्के विमानानि भवन्ति। ब्रह्मब्रह्मोत्तरे मिलित्वा लक्षचतुष्कप्रमितानि
विमानानि भवंति।।छ।। तत्तो जुम्माणति एयपण्णासं तालछसहस्साणं सत्तसयाणि यआणदकप्पचउक्के
सुपिंडेणं।।४५४।। ततो लांतवादियुग्मत्रये यथासंख्यं पंचाशत्सहस्राणि चत्वारिंशत्सहस्राणि षट्स
हस्राणि विमानानि। आनतादिकल्पचतुष्के पिंडेन सप्तशतानि भवंति। एक्कारसुत्तरसमहियसयमेक्का
रउदिणवयपंचेव। गेवेज्जाणं तिन्निसु अणुदिस्साणुत्तरे होति।।४५।। एकादशसमधिकशतं। स
प्तसमधिकशतं एकनवति। नव च पंचैव। यथासंख्यं अधस्तनादि ग्रैवेयकाणां त्रिस्त्रिषु अनुदिशाय
मनुत्तरे च विमाउडुआदि तेवट्ठी।।४५६।। सौधर्मयुग्मे एकत्रिंशदिंद्रकाणि सनत्कुमारयुग्मे सप्तेंद्र
काणि। ब्रह्मयुग्मे चत्वारींद्रकाणि। लांतवयुग्मे द्वे इंद्रके शुक्रयुग्मे एकमिंद्रकं। शतारयुग्मे एकमिं
द्रकं। आनतादिचतुर्षु कल्पेषु षडिंद्रकाणि। अधस्तनादिषु त्रिषु ग्रैवेयकेषु प्रत्येकं त्रीणि त्रीणींद्र
काणि नवानुदिशायामेकमिंद्रकं पंचानुत्तरे चैकमिन्द्रकं। एतेषां ऋतुविमानादींद्रकाणां नामानि च त्रि
षष्टिर्भवंति एते। एतेषामिंद्रकाणां मूर्द्धांतरं तन्नामावतारं चाह।।छ।। एक्केक्कइंदयस्स य विच्चालमसं-
खजोयणपमाणं। एदाणं णामाणं चोद्दामो अणुपुव्वीए।।४५७।। एकैकमिंद्रकस्यांतरालमसंख्यगत
योजनं स्यात्। एतेषामिंद्रकाणां नामानि चानुपूर्व्या वक्ष्यामः। उक्तेंद्रकाणां नामानि गाथाषट्केनाह।।छ।।
उडुविमलचंदवग्गूवीररुणंणंदणंचणलिणं च। कंचणरोहिदचंचंमरुदंद्धिसयवेलुरियं।। =

४५८॥ रुचकं रुचिरं अंकं स्फटिकं। तपनीयं मेघं। अभ्रं हारिद्रं पद्मं लोहितं वज्रं। नंद्यावर्त्तं प्रभंकरं॥२३॥
पिट्ठकगजमित्तपहा अंजणावणमालणागगरुडं च। लंगलवलभद्दवयवरक्कं चरिमे च अउतीसे॥४६०॥
पृष्टकं गजं मित्रं प्रभं अंजनं। नवमालं नागं गरुडं च। लांगलं। बलभद्रं च। चरमेंद्रकं चक्रं इति सौधर्मा
दि चतुष्केपि डेनाष्टात्रिंशदिंद्रनामानि॥३८॥ ॥ रिट्ठसुरसमिदिबम्हं बम्हुत्तर बम्हहिदय लांतवयं।
सुक्कं खलु सुक्कडुगे सदर विमाणं तु सदरडुगे॥४६१॥ अरिष्टसुरसमिति। ब्रह्म ब्रह्मोत्तर नामानीकाणि।
ब्रह्मयुगे। ब्रह्म 

हृदयं लांतवकमिति द्वयं लांतवयुगे शुक्रयुगे खलु शुक्रे शतारद्विके शतार
विमानेंद्र कं॥ ॥ आणदपाणदपुष्फयसातकरणच्चुदव साणे तोगेवेज्जसुदरिस
णअमो हतहसुप्पबुद्धं च॥४६२॥ तं प्राणत पुष्पकं शातकं तथा आरणच्युतमि
तींद्रकनानि आमनाद्युना वसाने स्युत्तो ग्रैवेयकेषु सुदर्शनं अमोघं तथा सुप्रबुद्धं
च। जसहर सुभद्दणामा सुविसालं सुमणसं च सोमणसं। पीदिंकरमाइच्चं चरि
मे सव्वट्ठ सिद्धीदु॥४६३॥ यशोधरं सुभद्रनाम। सुविशालं। सुमनसं च। सौमनसप्री-
तिंकरं नवानु दिशायामादित्यें द्रकं। चरमे सर्वार्थसिद्धींद्रकं॥ ॥ मेरुतलादुदिवड्ढमित्या
दिगाथोक्तार्थे सर्व त्र विमानानि। निष्टंति किंतु निश्रेनपरिहारः हा॥ ॥ णाभिगिरिचूलिकुवरि वाल
ग्गत्तरद्वियो हुउडुदे। सिद्धीबोधोवारहजोयणमाणम्हि सव्वट्ठ॥४६४॥ नाभिगिरिचूलिकोपरि वाला 
ग्रांतरस्थितः खलु ऋत्वींद्रकः सिध्यते नोरधः द्वादशयोजनप्रमाणेन सर्वार्थसिद्धिस्तिष्ठति कल्याना-

१भित्तरेखांचविक्रियादीनांसीमानमाह॥छ॥सगसगचरिमिंदयधयदंउंकप्पावसाणमंतंखु॥क
प्पादिदवणिस्सयअंतंयंतयंहोदि।४६५।स्वकीयस्वकीयचरमेंद्रकध्वजदंडःकल्पावनीनामंतःख
लुकल्पातीना वनेरंतोलोकस्यांतेभवति।अथेंद्रकाणांविस्तारमाहमणुसखेत्तपमाणंउडु
सवट्टंतुजं बुदीवसमं।उभयविसेसेरुंदयभजिदेहुदहाणिचयं॥४६६॥मानुष
क्षेत्रप्रमाणं ४५०००००ऋतिंद्रकंसर्वार्थसिद्धीद्रकंतुजंबूद्वीपसमं१लउभयोर्वि
शेषेरो धिते४४लरूपन्यूनेंद्रकै६२र्भक्ते७०९६७शे ३२/३१ इदमिन्द्रकंप्रति
हानिच यंस्यात्अस्यविवरणंपंचोत्तरचत्वारिंशल्लक्षे भ्यःअस्मिन्७०९
६७शे ३२/३१ अपनीते४४२९०३२ ८/३१ द्वितीयेंद्रकप्रमाणंस्यात्।एवंयावदेक-
लक्ष- ३१ भवतिछतेतावदपनीते ३१ तत्तदुत्तरेतरेंद्रकप्रमाणं

